मुपेत्यापि क्रमः। अगोगोः इत्यमभवद्भो भवदित्यादौ गमे ओ इत्यो कारस्य प्रतिपदोक्ततया अति प्रसंगः स्यादेव। नन्विह गो
णमुख्यन्यायेन समाधानमस्तु। तथाहि। संधीभवंति ब्राह्मणात्तद्भवति देवदत्तः। मद्रद्रवसित्वं लक्षणाम्यहमित्यादौ वेचन
पुरुषव्यवस्थानुरोधेन च्विप्रत्ययस्थले सर्वत्र प्रकृतेरेव कर्तृत्वमिति सिद्धांतस्थितिः। तथा च प्रकृतौ अभ्रोपाद्वर्त्तमा
ना क्विल्लिति वाक्ये च्वी चेत्प्रयोगो च्विप्रत्ययं प्रतिप्रकृतिभूतस्य बाहीकादिवत्ते गौणत्वे गोणार्थतास्पष्टैव। अत एव
महान्महान्भूतो महद्भूतश्चंद्रमा इत्यत्रान्महत इत्यात्वं न प्रवर्त्तत इति चेन्न। हेषांतलाष्टीतिकयो वैषम्यात्। तथाहि। विशि
ष्टरूपोपादाने गौणमुख्यन्यायः। तत्सार्थवदुद्ग्रहणे नानर्थकस्येत्येतत्परिभाषामूलकत्वात्। अयोपस्थिते स्वरूप विशेष
ग्रहणापेक्षत्वात्। तस्मान्महतइति विशिष्टरूपग्रहणेन विधीयमानमात्वं गौणे न भवतीति युक्तं। इह तु ओदिति
वर्णोपुरस्कारेण विधीयमानाप्रगृह्यसंज्ञा कथं गौणार्थ प्रवर्त्तेन भवेत्। निपातसंज्ञा तु तस्यापि मुख्यैव। अत एव हि संज्ञा
आदेचउपदेशइतिसूत्रे उपदेशग्रहणं ज्ञापकं वर्णग्रहणेषुक्तपरिभाषाया अप्रवृत्तौ किंच यदि वर्ण ... परिभाषा प्रवृत्तिः स्यात्तर्हि ...
उपदेशग्रहणस्य वैयर्थ्यमेव स्यादिति ४

शब्द॰कौ॰ श्वशुरस्यापत्यं श्वाशुरिरित्यत्र एजस्य वृद्ध्यादिकं न प्रवर्त्तते। अन्तरङ्गत्वात्तु प्रवर्त्तत एव। अन्यथा इञोयतश्च तुल्ययोगक्षेमत्वे वृस्या
त्। अत एव गोर्बाहीको ब्रूते गोर्वाहीकं पश्येत्याहोदाहार्यं एव। एतदो पर्यवसानाश्रयत्वात्। गोन इति तपरत्वमोकारान्तोप
लक्षणार्थमिति विज्ञायमानत्वात्। तथा च ओतो णिति सूत्रे भाष्यं लड्डू स्थानि। गामित्यत्र यणादिवृद्धिर्निरवकाशेन आत्वेन
बाध्यते इति। तत्रैव कैय्यटोप्येवमाह। ओत इति सूत्रं पाठ्यं। ओकारान्तोपलक्षणं तथा च गोतरङ्गत्वे ताश्वेषमिति। वस्तु
दित्यंशे चेष्टैवमेवस्थितं। यत्तु वदन्ति। मुख्यस्य स्वार्थे मानाद्यमिति गोशब्दो लक्ष्यां लभते। ततो बाहीकादिशब्दांतर
संनिधानाद्गौणता प्रतीतिः। गोभवदित्यत्र तु गोणतां विनाविरेव दुर्लभ इति वैषम्यं। तस्मात्पदकार्यविषयं न्यायोनप्रा
तिपदिककार्यविषयमिति स्थितमिति। तच्चिंत्यं। वाक्यसंस्कारपक्षे हि ध्यात्वप्रवृत्तेः प्रागेव गोणार्थावगतेः। यत्तु कारकाणां क्रिय
यैव श्रोतः संबंधः। तत एक क्रियायाः स्वीकृता नाम गौणोकस्य पदान्तरान्वयेन पाष्ठिकः परस्परावछेदः। तथा चगमानयेत्यन्व
यवेलायां न गोणार्थता। किंतु बाहीकेन सह पाष्ठिकावछेदवेलायां। न चांतरंगत्वेन प्रवृत्तः पदसंस्कारो बहिरंगगौणता तद्भवः
लप्रतीतावपि निवर्त्तत इति। तदपि न। तावतापि ब्रूते पाठयेति क्रियान्वयार्थेव गौणतायाः आश्रयणीयत्वात्। केरोपिक १५०
मभीष्माद्द्योपीति पक्षे कथंचित् युक्तिसंभवेपि समानाधिकरणतया ह्रीष्मादेर्द्वितीयेस्वरूपेभाष्ये कं पक्षांतरे त्वदुक्तत्वा।

केचित्तु [illegible] विशिष्टरूपोपादाने रवेषं परिभाषापरं तु पदकार्ये [illegible] तथा [illegible] भाष्यप्रयोगाः [illegible] अन्यथा [illegible] भाष्यप्रयोगः [illegible] [illegible] मानाभावात्। [illegible]

याबतारा च श्वाशुरिरित्यत्र त्रोप्यभावापत्तेश्च। शब्दप्रयोक्ता बाहीकनिष्ठस्येव कर्मत्वादेर्विवक्षितत्वाच्च। तस्माद्गौणा
श्रयत्वाद्ध्यात्वं दुरेव तत्त्वं। न तु प्रातिपदिककार्यत्वादिति। अत एव च एकाम्रप्राचामित्यादौ प्रातिपदिककार्यत्वेपि न स्मादा या
दयः। विशिष्टरूपपुरस्कारे गौणस्य सर्वनामसंज्ञाविधानात्। अभिव्यक्तपदार्थायेइत्यविशेषेण मुख्यन्यायसिद्धार्थकथनपरं। प्र
सिद्धाप्रसिद्धत्वे एव हि मुख्यत्वगौणत्वे इत्यन्यत्र विस्तरः। अत एव सर्वादिसूत्रे सत्योपसर्जनप्रतिषेध इति वार्त्तिकं प्रत्या
चक्षाणो हरदत्तश्चाह। संज्ञाप्रतिषेधस्तावन्न वक्तव्यः। अभिव्यक्तपदार्थायेइत्येव सिद्धत्वादिति। यत्तु तत्र कैय्यटोवक्ष्य
ति। प्रसिद्धाप्रसिद्धिविशेषसंभवन्नपि गौणमुख्यन्यायो नेहोक्तः। पदकार्यविषयं न तु प्रातिपदिककार्यविषयमिति श्रोतसूत्रे उक्त
त्वादिति। तदस्पुशब्द्यमात्रं। पुष्पदन्तसूरेः स्वरूपमात्राश्रयाणामुपसर्जनत्वाभिवसंज्ञायां प्रसंगापत्तेः। पुष्पद्युपदे कार्याणाम्
अस्मद्युत्तम इत्यादावपि तत्प्रापत्तेश्चेति दिक्। तदेवं अत्रोभवत्त्रोभवदित्यादौ ओदिति प्रश्नस्य संज्ञाश्रयत्वाद्विदुर्वी
रेति सर्वपक्षः पर्यवसन्नः। अथोच्यते। एवं सूत्रे अनादि तिपर्युदासादादुत्तरस्य शाः प्रतिपदपठिता एव निपाता गृह्यं
ते रह्वाप्यर्थाधिकारेणाऽनाद्यर्थग्रहणानुवृत्त्या वानर्थेवेति सर्वं सुस्थं। तथा च सर्वादिसूत्रे अकारान्तोऽनुपसर्जनत्वम
नेव भेवत इति महदन्तरोऽयः सावितिसत्वं तद्विशेषितत्वान्नैरन्तयामपिस्यादित्याशंक्य यत्तदादीनाम इत्यत्र अनुपस

[illegible]

सदादीन्युत्तरादि २

शब्दकौ०

र्जनादिति परिभाषया अनुपसर्जनानामेव ग्रहणे सिद्धे तथाभूतानामेव सत्त्वविधावनुवर्त्तनान्न कश्चिद्दोष इति समाधेयं न कष्ट-
तः॥ ॥संबुद्धौ शाकल्यस्येतावनार्षे। आर्षिवेदः। तदुक्तमर्षिरोसावोतं तथा दर्शनात्। संबुद्धिनिमित्त ओकारो अवैदिके इतौ
परे प्रगृह्यो वा स्यात्। विष्णो इति। विष्णविति। संबुद्धाविति किं। गवित्ययमाहेति। वृत्तिकारः। एतच्चिक्कः पश्चपूर्व सूत्रे उक्तेः एव। अनार्षे
किं। ब्रह्मबंधविरित्यब्रवीत्। इतावितिकिं। पटो अत्र। उञः॥ उञ इतौ प्रगृह्यसंज्ञो वा स्यात्। उइति। विति। ऊँ। उञ इत्यनुवर्त्तते।
शाकल्यस्य प्रगृह्यमिति चाप्रगृह्यस्य उञ इतौ परे ऊँ आदेशो वा स्यात्। दीर्घोऽनुनासिकश्च ऊँ इति। इह यदि एकोयोगः
स्यात् उञ ऊँ इति तदा आदेशो विकल्पितेरूपद्वयमेव स्यात्। ऊँ इति। उइति। अतो योगं विभज्य प्रगृह्यसंज्ञापि विकल्पिता।
एवमपि ऊँ इति द्वितीयसूत्रे यदि प्रगृह्यग्रहणं शाकल्यग्रहणं चैतदुभयमपि नानुवर्त्तेत तदा उञो नित्यं ऊँ भावविधा
नात् प्रगृह्यस्यैवाप्रगृह्यस्याप्यादेशः स्यात्। तत्र प्रगृह्यस्यादेशे कृते स्थानिवद्भावेन प्रगृह्यत्वात् ऊँ इति रूपं सिद्धं। न चान
ल्विधाविति प्रतिषेधः। उञ इति समुदायरूपेणाश्रयणात्। तथा च घट्टदीघीतिसूत्रे उ इति समुदायरूपाश्रयणात् दीधीङ्
दीतिरित्यत्र दीर्घस्य स्थानिवद्भावमाश्रित्य ततिलोपः सिध्यतीति स्थानिवत्सूत्रे व्यक्तं। अप्रगृह्यस्य तु आदेशे
अनुनासिकोयणस्यात्। तथा च इष्टरूपत्रितयमध्ये ऊँ इत्येकमेव सिद्धं न त्वपरं द्वयमित्याशयः। अतियाति श्व। सानु

अप्रगृह्यः प्रकृते स नत्र

रामं०

न च प्रगृह्यमिति संस्य प्रथमांतत्वादादेशेनैव संबंधः स्यादिति वाच्यं तथा चोञात्रस्यनिसंप्रगृह्यसंज्ञकरं भावविधानेयोगविभागेनप्रगृह्यसंज्ञाविधानमनर्थकं स्यादिति बोध्यं

नासिकवकारयुक्तं स्यादिति एवं ऽपि प्रसंगात्। अथ प्रगृह्यग्रहणमात्रमनुवर्त्तेत। तदा प्रगृह्यस्य उञो नित्यं मादेशः स्यात्।
ततश्च विति ऊँ इति इति रूपं न स्यात्। तन्न तु उ इति। तिसृतीयं। अथ शाकल्यग्रहणमात्रमनुवर्त्तेत। तत उञ्मात्रस्यादेशविक
ल्पनात् ऊँ इति उ इति इति द्वयं प्रगृह्यस्य। विं ति विति इति द्वयमप्रगृह्यस्येति संकलनया रूपचतुष्टयं स्यात्। तत्र विति पक्षे त्वपि
सानुनासिकवकारयुक्तमनिष्टमापतति। तस्माच्छाकल्पग्रहणं प्रगृह्यग्रहणं चेत्युभयमनुवर्त्तते इत्युक्तं। इह विभक्तिविपरिणामेन
प्रगृह्यस्य उञ इति व्याख्यातं। आदेशसामानाधिकरण्येन प्रगृह्यं ऊँ इत्येतदादेशो भवतीति व्याख्याने पि न कश्चित्फ
लेविशेष इत्यवधेयं। ननु परिनिष्ठितमेव प्रयोगार्हं। परिनिष्ठितत्वं च अप्रसक्तनिमित्तविध्युद्देश्यतावच्छेदकानाक्रांत
त्वं। निहतेतितं तादृशव्याप्तिवारणाय अप्रहतेति। वैकल्पिके आगमोद्देश्यतावच्छेदकाक्रांते तेसिद्धे तादृशव्याप्तिवा
रणायोक्तं नित्येति। अतएव पचूल इत्यादीनां लौकिकत्वेनासिद्धांतः। तथा च उ इति इत्येतद्रूपं न स्यादेव। अत्र हि
शाकल्यमते ऊँ आदेशेन भाव्यमेवा इतरेषां तु मते प्रगृह्यत्वमेव नास्ति इति चेन्न। भवेदेवं यदि शाकल्यग्रहणं पर्याप्तौ स्या
त्। न त्वपि विकल्पमात्रता त्पर्यकं। तथा च भाष्ये। शाकल्यस्य विभाषायां पर्याप्तिरिति। ऊँ वा शाकल्यस्येति। तथा च
तत्र केवरः। शाकल्यश्रुते रेवफलं वाग्रहणेन प्रतिपादयतीति। सप्तसंतंत्रानुसंधान द्वारेण विभाषासंपद्यते इति च।

रव्याप

२१

[illegible]

शा.र.कौ. पद्य। अस्तु शाकल्यग्रहणं पक्षे प्राप्तौ। तथा च निपात एकाजनाङ् इति नैव सिद्धे उञ इति तावन्नियमार्थं। तथा च शाकल्यभिन्न
मतेन प्रगृह्यत्वेति प्रथमसूत्रार्थः। उञ इत्यत्रैव प्रगृह्यस्यान इत्येतावत्येव शाकल्येन लब्धे पुनः शाकल्यानुवृत्त्या इतरेषामपि म
ते पाक्षिकः प्रगृह्यो लभ्यत इत्यनुमीयते। तेन उ इति रूपं सिद्धं। अथवा उञ इत्यत्रैव पुनः शाकल्यानुवृत्तिसामर्थ्याल्लब्धाधिकारा
प्रयोगेन शाकलस्यैव आर्षे पक्षे तु प्रगृह्यते। अस्मिंश्च पक्षे प्रगृह्यसंज्ञ इत्यनुवादसामर्थ्यादेव प्रगृह्यतापि लभ्यते। प
क्षाद्वकि लोपः इत्यनुवादसामर्थ्याद्विधिरिति दिक्। आदेशाश्चायमनुनासिक इति। निर्देशादेवाध्यक्षं। तथा च वङ्कच प्रातिशाख्यं। उ
कारश्चेति करणेन पुकारस्तोए को इति शाकलेनेति। एकस्तोऽनुनासिक इति च। अत एव पदे तत्ते इति पदकाराः पठन्तीत्यनु
करणेऽपरेऽनुनासिकेऽनुनासिको वेत्येष विधिः प्रवर्त्तते ईदूतौ च सप्तम्यर्थे। शाकल्यस्येताविति निवृत्तं। ईदूदन्तं सप्तम्यर्थे रूपं
सप्तम्यर्थे वर्त्तमानं प्रगृह्यं स्यात्। अध्यस्यां मामकी तनू। मामक्यां तन्वामिति प्राप्ते सुपां सुलुगिति लुप्तसप्तमीकावेतौ। मामकी इति त ५४
नू इतीतिपदकाले कार्येति हरतो बोध्ये। सोमो गौरी अधिश्रित इति संहितायामप्युदाहरणं। ईदूतौ किं। प्रियः सूर्ये प्रियो
अग्ना भवाति। अग्निशब्दात् परस्याः सप्तम्याडा आदेशः। परकार्यैः प्रगृह्येषु इति शाहु प्रयोगस्य नियमितत्वेन हापि परका एम॰
लि इति शाहुप्रयोगप्रसंग इति प्रत्युदाहरणमिदं। सप्तमीग्रहणं किं। धीती मती सुष्टुती। धीत्या मत्या सुष्टुत्या इति प्राप्ते ती

सुपां४

[illegible]

न: ८ न: ५।।

येकवचनस्य पूर्वसवर्णदीर्घ ईकारः। ततोऽकः सवर्णे दीर्घ इत्येकादेशः। न त्विह सुपो लुक्। ह्रस्वश्रवणापत्तेः। अथग्रहणं किं।
वाप्यामश्वो वाप्यश्वः। नद्यामातिर्नद्यातिः। संज्ञायामिति सप्तमीसमासः। ननु सप्तम्यर्थपदार्थस्योपिहास्त्येवातः कथमर्थग्रह
णाकृते पीए सिद्धिरिति चेन्न। अस्यां जहत्स्वार्था वृत्तिरिति पक्षे पदेन वर्णेन वक्तो वृत्तिपदानामानर्थक्यादीदन्तमिहानर्थकं
न तु सप्तम्यर्थवृत्तीति स्पष्टमेव। अजहत्स्वार्था वृत्तिरिति पक्षेपि उपसर्जनपदं न स्वार्थमात्रे पर्यवस्यति। किंतु तत्संसृष्टे
प्रधानार्थे अर्थग्रहणसामर्थ्याद्वयावानर्थः सप्तम्याभिधीयते आधेयासंसृष्टः। निष्कृष्टाधिकरणरूपः तावन्मात्रस्ये
हग्रहणमिति द्रुतिनिपत्तिर्न भविष्यति। यद्यपि वाक्यवत्समासेपि लुप्तसप्तमीबलेन अधिकरणमात्रबोधः पश्चाद्धा
न्यार्थे तयासंसृष्टबोध इति वक्तुं शक्यते तथापि सिद्धान्ते तावत्समर्थः पदविधिरिति परिभाषानुरोधात्समासस्थले एका
र्थीभाव एव सामर्थ्यं न तु व्यपेक्षा। अत एव उपसर्जने विशेषणान्वयो न भवति शाक्यैकदेशत्वादिति हितीपे वक्षते।
मीमांसकादीनामपि निषादस्थपतिन्यायेन पूर्वपदार्थसंबंधिनि लक्षणा प्रपन्नमाधुक्तेव अर्थग्रहणेन वाप्यश्व इत्यादा
विष्यन्ते अप्राप्तिः। आतिर्बलाका। शरारिराटिराडिश्च बलाका बिसकण्ठिका तथा। अमरः। आटिशब्दोऽपि स्त्रीलिंगः।
बलाका साहचर्यादिति केचित्। वस्तुतस्तु शरार्यादिपदत्रयं पक्षिविशेषवाचकं। ननु बलाकापर्यायाः अतो बलाकास

२२

तथा च सरसीद्वत्येव सप्तम्यादिरिति भावः ४

शा॰त॰कौ॰ हचपि मर्किंचित्करं। स्त्रीत्वं तत्स्येव। रत्नकोशेऽस्त्रीलिंगकांडे स्वादिः शारीरिर्वरसी सुके॥ इत्या तेरयितत्स्वाहुचर्यात्। तत्परकारण मसंदेहार्थमितिहृत्तिः। अत्र वार्त्तिकं। ईद्दूतौ च सप्तम्यर्थे इत्येव लुमर्थग्रहणाद्भवेत्। प्रत्ययस्य चेत्स्वर्गाधिति वाडाम भावः प्रसज्यते। वचनाच्चत्रदीर्घत्वं तत्रापि सरसी यदि। ज्ञापकं स्यात्तदंतत्वे मा वा पूर्वपदस्य भूत्। अस्यार्थः। ईदूतौ च सप्तमीत्येवास्तु नार्थग्रहणेन। अत्रोत्तरमाह। लुमर्थ इति। संज्ञाविधौ प्रत्ययग्रहणे तदंतविधेरभावात्सप्तम्या एव संज्ञा स्यात्। लुकेऽपि सुपि प्रकृतिभा गस्य संज्ञासिद्धये तु कर्तव्यमेवार्थग्रहणमित्यर्थः। ननु सोमो गौरीत्यादौ विभक्तिर्न लुप्यते। किंतु श्रीतीत्यादौ विच्छेदं स वर्णे हि ते अकः सवर्णे इति दीर्घ एकादेशे तस्यादिवद्भावात्सप्तमीग्रहणेन ग्रहणादस्त्येव सप्तमीत्वान्नर्थग्रहणं। सर्वस्येति। आडाम भाव इति। एकादेशं बाधित्वा परत्वादंगत्वाच्च आडामौ स्यातामित्यर्थः। तस्माल्लुग्गेवेतिरित्येनेऽर्थग्रहणं कर्तव्य मेवेति भावः ननु अर्थग्रहणं मास्तु वचनसामर्थ्याच्च संज्ञाविधावपि तदंतविधिर्भविष्यतीत्याशंक्याह। वचनादिति। यत्र दीर्घत्वं तत्रैव वचनात्स्यात्। इति न त्वंत्यं सरसीशब्दात्परमितिपर्था। अत्र हि सरः शब्दात्परस्य सप्तम्येकवचनस्य डत्वा ङीकारेणासुपसंख्यानमिति ईकारादेशो सप्तमीश्रूयते। तथा च सोमो गौरीत्यादौ स्यादेवेत्यर्थः। एतदूष राम॰ यति। तत्रापीति। तत्रापि सप्तम्या लुगेव न तु ईकारः। यदि सरसीशब्दो वर्तते। असंदिग्धं संदिग्धवचनमेतत्। शारुना। इ

यद्यपि ईकारांतेदर्धसरस्सरसिताः विशेषः तथापि नाम की त्वरूपद्उकारांते विशेषः साङ्गः६

सुपं तु लुग्निमित्ताभावाच्च दान्यत्वाद्या स्वांतरे आद्युदात्तपाठोप्यस्तीति किं चलमेतत्। तत्र पाठिरस्य हि तिनभ्रुकमिले वेगाहरण सदंदलाकुत्तम प्रकृतस्तत्स्वभावविरोधात्। तत्र हि सरसीशब्द एवो दाहृतः। सिद्धांते विशेषाभावाद्युदाहरणद्विक्कं चेसाङ्गः६

पे॰२ चेत्यमरः। स्युरिति यथा। अस्ति हि सरसीशब्दः। दक्षिणापथे हि महांति सरांसि सरस्य इत्युच्यंते इति भगवद्भुक्तेः। कासारः सरसी सरस्यामरकोशाच्च। तथा च सरसीः परिखीलितुमित्यादिप्रयोगोपि दृश्यते। एवं च सरसीशब्दोपि लुप्तविभक्तिक एवेति विचना त्तदंतविधिरिति स्थितं। ननु करीत्यात्तस्तु सरसीशब्दः। सरः शब्देपि सांतो निर्विवाद एव। तथा च सांतादेव ईकारादेशो यम स्तु स्वं हि सनिति संज्ञाविधौ ज्ञापकात्प्रत्ययतदंतग्रहणे पुनराश्रयणं न कर्तव्यं भवतीति चेन्न। तथा सति ईकारस्य सुसेना त्वरोन्नतपाम रः शब्दस्य च सह धातोस्तु निषु परितस्य निर्ह्रासेण सरसीत्यन्निप इति माधुरान्तं प्रसज्येत। गौरादिषु पिप्पल्या द्यश्चेति पाठात्तेपिप्पल्यादयः। पाति नः सरः शब्दानन्तर्गता इति च निरूप्यते। तद्येव वेदे पाठात्। एवं हि प्रत्ययसंज्ञा प्रकरणे प्रत्ययलक्षणानाम्नीति ज्ञापनाय चेदर्थग्रहणमस्तु। एवं चेदिह देहि वचनमिति स्वत्रे ईदूदेदंतं द्विवचनांतमित्ते पक्षे ईदूदेदंतं यद्द्विवचनं तदंतमिति पक्षश्च समर्थितो भवति। तत्र हि कुमार्योरगारं कुमार्यगारं अत्र कुमार्यो इत्यत्र समयदेतां इ अप्राप्तां वचनत्वात्रानित्यादिरिति शेषः। सच प्रत्ययलक्षणाविरहाद्दृश्यत इत्याह। ज्ञापकमिति। प्रत्ययसंज्ञाप्रकरणे प्रत्य यलक्षणाभावस्येति शेषः। किं ज्ञापनमपक्षुप्यते तदाह। तदंतत्वे इति। तदंतत्वं गर्भेपि सद्द्वयेषीत्यर्थः। ननु संज्ञाविधौ प्रत्य यग्रहणे तदंतविधेरभावादेवतदंतपक्षस्तत्र न स्थित इत्यपरितोषादाह। मा वेति। वाप्यस्यां इत्यादौ माभूदित्यर्थः। अत्रेदम

६

[illegible] ... ब्राह्मणपत्युपसर्ग ... [illegible] ... नातिवोध्य भिन्ना ... [illegible]

[illegible]

[illegible] ... स्वाद्यपरतः ५

श॰ कौ॰ वर्षेयं स्यमित्यु ऋतं त्रिभ्यईरिति सूत्रादीरित्यनुवर्त्तमानेयापोः किट्वा वातप्रमीरितिसूत्रात्प्यात्रा ब्रूत्रपसुसारितत्यात्स्पनेने
तिय यीत्सोहि मार्गः पिबतिरहा ग्मातिवालोकमितिपयीः सूर्यः। वातंप्रमिमीतेसंमुत्रधावनादितिवातप्रमीः। नि: इंगेग्न्गा
रूनिर्वीतम गन्तामाय गुड विशेषः। एभ्यस्त्रिभ्योविशेसवर्णा दीर्घाध्ययीपयीवातप्रमीरितिरूपं निर्विवादं। तथाचहहृत्र्ययमा
ग्यस्य ईकारस्य सप्तमीता त्र त्रापि सरसीयदीत्यसंगतं। ईकारस्य त्र्ययमाणस्या संभवात्सामर्थ्यात्तदंतविधिर्भविष्यतीतिहित
स्यार्थः। तस्माद्धकारांतो सामर्थ्यात्तदंतविधौलक्ष्वे सोमो गौरीरत्यादावपि भविष्यतीत्याशयः कल्प्यः। ययी श्रासक्वड्त्यो
दौतुभाव्यमेवप्रकृतिभावेन। नर्वाययोगं श्छांदसः। तथाभिधानामेवोदाहरणान्नोरनलादितिवाच्यं। मुनित्रयोक्तिं विना श्र
स्मदिच्छयाछंदसत्वकल्पनेत्र्प्रतिप्रसंगात् लोके प्रयुक्तत्वा। नभवतीत्यस्मिन्नर्थे प्रमाणानुपलंभाच्च। अप्रतिषिद्धमनुम
तंभवतीतिन्यायेनलोकेपियपीयपीवातप्रमीरित्येषांप्रयुक्तत्वस्यैवन्याय्यत्वाच्चेतिदिक्। अत एव रमृशावत्प्रितिसूत्रेदृशे
वेतिवार्त्तिकमुपादायक्सप्रत्ययः सादेशश्च छंदस्येवभाष्ये सदृशसहत्युदात्तत्वादितिकेचित्। इतिव्याचक्षाणा हरदत्ता रम॰
दयश्छांदसत्वंप्रदतांमतेस्वस्पापरितोषमाविष्कुरितिदिक्। दाधाघ्वदाप्। दारूपाधारूपाश्चधातवोघुसंज्ञास्युर्दाप्दै
पौवर्जयित्वा। तत्र दारूपाश्चत्वारः। दुदाञ्। प्रणिददाति। दाण्। प्रणियच्छति। दोप्रणिद्यति। देङ्। प्रणिदयते। धारूपौद्वौ।

आमेयदत्वाभ्रुत्पत्तिर्भावः ५ ... दाधाघ्वसनयोः प्रसयोगेर्नत्वणं घुसंज्ञाकाभावात्दाप्दास्वर्मद्योसाकु २

श॰ तृ॰ कौ॰ दलुनेहग्रहणं। तदनुकरणेपात्वासंभवात्। वार्त्तिकमतेप्रज्ञंतानांदीङादीनामात्वविधानात्। भाष्यमतेत्वेज्निमित्तेपरतस्तद्वि
धानात्। तेनदीङ ह्रदत्रातत्वात्वेकृतेपिघुसंज्ञा विरहात्प्रणिदातेसत्र्यनेगदेतिनिसंणात्वंनभवति। शेषे विभाषेति वैकल्पिकं तु
णादेवा। तथा उपाद्धात्तास्तम्भः। शिक्षक सैत्यत्र स्थाघ्वोरिच्चेतिरत्वंनभवतीतिसूत्रकारस्यमतं। नन्वस्मिन्पक्षेदाप्दैपावनुक
तौनवा आद्येनुकरणपर्युदासो भयसामर्थ्यात्तयोर्घुसंज्ञाविकल्प्यः स्यात्। अंत्ये त्वदाबितिव्यर्थे स्यात्। अननुकृतत्वा
देवदाप्दैपोर्घुसंज्ञाप्राप्तिविरहादितिचेन्न। अदाब्दित्यस्मिन्नसतितयोरप्यनुकरणांसंभाव्येत। नहिल क्षणैकचक्षुषा रोदेव
दीनांदाप्दैपोश्चैकेलक्षणयंकिंचिदनुभूयते। यद्वा लाक्षणिकग्रहणोग्रस्यसाम्भेयानो व्याख्यानतो विशेषप्रतिपत्तिरि
तिपरमवशिष्यतेकिंतुश्रातिकगतिरेषा। अनभिधानवत्। नवत हल्नेनुसिद्धस्य प्रत्याख्यानं शोभते। वार्त्तिककारमतेतुप्र
योगस्यानामेवदाधारूपाणामिदमनुकरणं। नचैवंप्रणिधतिप्रणिदयतेरूपादोविति न स्यात्। आत्वाभावात्। तथाहिद्द
क्षणो। आदित। धेट्। व्यत्ययपित। प्रणिदातप्रणिधानेत्यादावपि न स्यात्। आत्वस्यतत्रलाक्षणिकत्वात्। लक्षणप्रतिप
दोक्तयोः प्रतिपदोक्तस्यग्रहणमितिन्यायादितिवाच्यं। वचनबलेनैतत्समाधानात्। तथाच कात्यायनवार्त्तिकं। घुसंज्ञा
यांप्रकृतिग्रहणं शिदर्थमिति। भोंदाजीपात्युपपत्तिं। शिद्विकृतार्थमिति। तथा च दाधाप्रकृतयो घुरितिपठितव्यमिदाश्चधाश्चप्र

[illegible] ... विकृतार्थमितिनोक्तमनेन १ ... [illegible] ... प्रतिपत्तिगौरवादि ... [illegible]

विभक्तौ श्रुति सो औ ६ तस्तूपलक्षणं विकृतावाचां अन्यथा प्रणिधयति प्रणिमय ... वपि संज्ञानस्याद् दोषस्याभावादिति बोध्यं

दुधाञ् प्रणिदधाति । धेट् । प्रणिधयति वत्सो मातरं । अदाविति किं । दाप् लवने । दातं बर्हिः । लूनमित्यर्थः । घुत्वाभावान्नेर्गदेति न प्र
वर्तते । दैप् शोधने । अवदातं मुखं । इह घुत्वाभावादेव उपसर्गात्तत्वेन न । घुप्रदेशाः नेर्गदनदेत्यादयः । उदरोदैड् धेटामनुक १।१।२०
रणानिवृत्त्यर्थाः । तत्र प्रकृतिवदनुकरणमित्यतिदेशाद्दाप्दैपोरपि घुत्वं प्राप्तं तन्नक्रियते । अनैमित्तिकमात्वं शितितु प्रति
षेध इति सिद्धं तात् । न चैवं विभक्ते रूपासिद्धिर्न स्यात् । अधातुरिति प्रातिपदिकसंज्ञानिषेधादिति वाच्यं । अधातुरिति हि पर्युदासो
१।२।४५ ऽयं न तु प्रसज्यप्रतिषेधः । अस्ति चेह सादृश्यमधातुत्वं । यद्वा । यत्र देते भूत्वादाविवेहापि कार्यविशेषपुरस्कारेणैवातिदेश प्र
वृत्त्यप्रवृत्ती भविष्यतः । ततश्चानुकरणानां दापादीनां घ्वाद्यर्थानिष्पत्तिः । प्रणिदातेत्यादौ कृतात्वानां दाप
ऽधेयं तु स्यादेवात्र वाक्ति संघुत्वं । लक्षणप्रतिपदोक्तपरिभाषायाः निरनुबन्धकग्रहणे न सानुबन्धकस्येत्यस्याश्चेह प्रवृत्तिः
सर्वेषां स्वरूपेणैवानुकरणात् । अत एव दारयति धारयतोर्नातिप्रसंगः । तयोरनुकरणत्वाभावेन इहाद्युत्पन्नयोरनुपा
त्तत्वात् । ननु कृतात्वस्य सूत्रे निर्देशात् प्रणिधयति प्रणिधयतीत्यादौ चात्वविरहात्कथं घुत्वमिति चेत् । भ्रान्तोसि । नहि वयं कृ
तात्वमनुकुर्मः । येनोक्तदोषः स्यात् । अपि तु देदोधे इत्येदं तेषेवानुक्रियमाणेषु लक्षणावशानि ष्पन्नमात्वमित्युक्तं । न च लक्ष
णेन रूपान्यत्वेपि अनुकरणता हीयते । सन्मुरसंबुद्धावित्यत्रापि सविरूपप्रतीतेः । गवित्ययमाहे सत्रगे द्वाव्प्रतीतेश्चादी
दोरूपस्य भावान्नस्यादित्याशंक्य

प्रत्येकं वाक्यार्थपर्यवसानेषु प्रकृतस्य ... संबंधिनामुपस्थितेषु ... प्रकृतानां निराकरणेन धात्वे वेति पर्यवसानेनानुवाक्योपरतेनम ... कान्त्यपायसाधादे
विधिविशिष्टरूपेषु ... तेनुवाल दधनमास्त्रवत् ... स्थानेशस्य संमतं स्यात् ॥

कृतप श्चेति द्वंद्वः कृतात्वसंनिधानाद्दाधामेव प्रकृतिप्रदर्शनि आत्वमेषां । भाष्यकारास्तु वार्त्तिकं प्रत्याचख्युः । तथा हि नेर्गदेति सूत्रे
तावदत्वरूपं प्रकृतिग्रहणं कर्त्तव्यं । प्रणिमयते प्रदापयते त्यत्रापि णत्वं यथा स्यात् । तदेव घुरूपात्प्रकृत्यघुप्रकृतिमाङिति
पठिष्यामः । घुश्च प्रकृतिश्च माङ् चेति द्वंद्वः । सन्निधानाच्च शुद्धो नरयोः प्रकृतिर्ग्रहीष्यते । न चैवं मीनातिमिनोत्योरपि माङ्
प्रकृतित्वात् ग्रहणापत्तिः । माङ्मेङ्कारानुबंधस्यैवतत्राविवक्षितत्वात् । अन्यथा मामानेत्यत्राति प्रसंगात् । तस्माद्घुप्र
कृतिमाङ् इतियाचेन प्रणिधयति प्रणिदयते इत्यादेः सिद्धत्वाद्विद्रर्थं तावत् घुसंज्ञायां प्रकृतिग्रहणं न कर्त्तव्यमिति स्थितं । आर
द्धाजीयोक्तरीत्या विकृतार्थं कर्त्तव्यमिति पुनरवशिष्यते । तदपि न । गामादाग्रहणेष्वविशेष इति परिभाषयैव लाक्षणिकस्या
पि दारूपस्य घुसंज्ञासिद्धेः । अस्याश्च परिभाषायां देपः पित्त्वं लिंगं । तद्धि अदाबिति सामान्यग्रहणार्थं क्रियते । लाक्षणिकत्वा
देव घुसंज्ञायां दैवग्रहणाभावे तु किं निषेधेन सामान्यग्रहणार्थेन पित्त्वेन । न चैवमपि धेटो घुसंज्ञा न स्यादेवेति वाच्यं । दोदद्घो
रित्यत्र धेटो निवृत्त्यर्थं क्रियमाणेन दद्रूपेन धेटोपि घुसंज्ञाज्ञापनात् । न च दधातिनिवृत्त्यर्थं दद्रूपस्येति वाच्यं । तत्र दध
तेर्हि रितिस्यादेशविधानादेव दद्भावाप्रसंगात् । नन्वेवमपि गामादाग्रहणेष्वविशेष इत्येते न लक्षणप्रतिपदोक्तपरिभाषा
या निरनुबंधकग्रहणे इति परिभाषायाश्चययथा बाधस्तथा अर्थवद्ग्रहणपरिभाषाया अपि बाधः स्यात् । तथा च प्रनिदा

सर्वान्वयसंपादकत्वेनैव समर्पणं स्यात् । अथा ... कमते कृतेपि प्रकृतिग्रहणे निरनुबंधपरिभाषा ... सामान्यानुकरणसामर्थ्यात् ... स्यामदर्निरन्वयोमा
इत्येवं वदंति केचित् ।

२५॥

अत्रघुकिंकेतेषुणत्वस्यासिद्धत्वासिद्धत्वात्कार्याभावाद्घुसंज्ञानप्रवर्त्तते [illegible] नचैवमपिनिमित्तत्वस्यासिद्धत्वात् [illegible] निमित्तान्तरघुसंज्ञा [illegible] भावाद्णत्वे
घुकिंघुसंप्रन [illegible] संज्ञकउपसर्गत्वाभावाद्प्राप्तिरिति [illegible] कार्याभावात् [illegible] अंतरंगत्वाद् [illegible] अनयोर्निमित्तत्वेन [illegible] उपसर्गत्वस्य [illegible] घुसंज्ञात
देघु [illegible] परिभाषया [illegible] घुसंज्ञा [illegible] इतिभावः [illegible] घुसंज्ञा [illegible]

श. कौ. रंयतिप्रनिधापयतीत्यत्राप्यतिप्रसंगइतिचेन्न। गदादीनांयउपसर्गस्तत्स्यान्निमित्तादुत्तरस्यतान्नेवगदादीन्प्रत्युपसर्गत्वमितिरिति
व्याख्यानात्। इहप्रनिधास्यतेत्यवयवयोस्तुदाधारूपयोरनर्थकत्वान्नतौप्रत्युपसर्गत्वं। यत्क्रियायुक्ताः प्रादयस्तंप्रत्येवगत्युपस
र्गसंज्ञाइतिवक्ष्यमाणत्वात्। नचैवंप्रणिदापयतिप्रणिधापयतीत्यत्राप्यणत्वंनस्यादितिवाच्यं। तत्रपुगागमात्पूर्वंदाधाइ
अंतरंगत्वाद्घु संज्ञात: प्रवृत्ता [illegible] तिभाव: ४ त्यवस्थायांघुसंज्ञाप्रवृत्तेर्णोपुग्विशिष्टस्यापिघुग्रहणेनग्रहणात्। अनागमकानांसागमकाआदेशाइतिपक्षेतुस्थानि
वद्भावेनघुसंज्ञातिदेशः। ननुअनंतर्यमेवैतयोरेतत्संप्रयोगोवानक्ष्राम्यदग्रस्वश्वदितिस्यान्नैतत्। तमसत्रस्यभाष्यरीत्यादा
रपतादेरपिदापयतादिसाम्यमेव। निष्पन्नस्यणत्वस्यरताभ्युपगमेनरेफयुक्तोपविशेषादितिचेत्तत्त्वे। पिदंतुप्रसंगेरपरतादि
सुरादानस्यसूत्रस्यवार्त्तिकरीत्यासमाधानंकृतं। उक्तभाष्यरीत्यातुप्रसक्तोदोषः प्रागुक्तसूत्रकारमतमाश्रित्यउद्धर्त्तव्यः। न
हिदृष्टअनयोरनुकरणेआत्वंलभ्यतेइतिदिक्। इहत्वंवधेयं। प्रणिदापयतीत्यत्रापिउपसर्गयोः प्रकृत्यर्थविशेषणत्वेसत्येव
नेर्गदेतिनिमित्तत्वं। णत्वंपर्यविशेषकत्वेतुघुमंतकंप्रत्यनुपसर्गत्वाच्छेषेविभाषेतिविकल्पएवन तुनित्यंणत्वमिति। एतेनेतत्।
उपरिदीषतेइत्यत्रसनिमीमेतिइस्सभावः स्यात्। वार्त्तिककृताघुसंज्ञायांप्रकृतिग्रहणात्। सूत्रकारभाष्यकारयोस्तुनासौ राम०
दोषः। सूत्रकृतादीङोऽनुकृतत्वात्। भाष्यमतेणत्वेप्रकृतिग्रहणेपिघुसंज्ञायांतद्विरहादितिचेत्सत्यं। वार्त्तिकमतेपिने

निदर्शनीसन्तुवेकः [illegible] भाष्यमते [illegible] लापंदेपरवप

भाष्यमतेपिप्रयोगस्थानामेवानुकरणात् [illegible] वार्त्तिककृत्वद्नसंगच्छतेतथ

यंदाप्रकृतिः। एजंतानामात्वविधानाभ्युपगमात्। नचैवमादंतत्वमस्ति वंधनपुत्रअत्ययाघसिद्धिः। तत्राकारांतलक्षणप्रत्ययविधिरि
तिवचनेनैवतत्सिद्धेः। भाष्येत्वेतद्वचनप्रत्याख्यानायएजिवषयेआत्वंसिद्धांतितमित्यन्यदेतत्। इहत्वंविशिष्यते। भाष्यवार्त्तिकोभ
यमतेपिउपाद्यत्तात्सस्वरः। शिक्षकस्येत्यत्रस्याघोरितीत्वंप्राप्तं। तत्रभाष्येसंनिपातपरिभाषयापरिहृतं। उपरीसूत्रइतिस्थितेएजि
षयेप्रवर्त्तमानमात्वमस्तिचोः कित्वमुपजीवति। यदिचात्रघुसंज्ञास्यात्तर्हिस्याघोरित्वेतिसिचः कित्त्वंस्यात्। अतोऽकित्त्वमुपजी
सं१ व्यप्रवृत्तआकारः। कित्वप्रवृत्तिकांघुसंज्ञांनप्रवर्त्तयत्येवेति। वार्त्तिककृतातुदीङः प्रतिषेधः स्याघोरित्वइतिवचनमेवकृतं। उभ
यमतेपिदीङस्तजादेशावात्वेकृतेप्रणिदातेत्यादौनेर्गदेतिणत्वंभवति। अतएववार्त्तिककृतादीङः प्रतिषेधइत्येवनोक्तं। किं
तुस्याघोरित्वेइतिविषयविशेषोपिनिर्दिष्टः। सूत्रमतेतुनभावंणत्वेनेतिस्पष्टमेव। किंचभाष्यवार्त्तिकयोर्नकेवलंसूत्रकृता
सहविरोधः। किंतुपरस्परेणापि। तथाहि। भाष्यमतेप्रणिदीयतेप्रणिदीनइत्यादावपिनित्येणत्वं। णत्वविधौप्रकृतिग्रहणात्।
वार्त्तिकमतेतुवैकल्पिकं। एजंतानामेवप्रकृतित्वाभ्युपगमेनईदंतस्याप्रकृतित्वात्। अन्यथाउपरिदीषतेइत्यत्रइस्भावाप
त्तेः। तदेवंप्रणिदानेसादौसूत्रकृतासहद्वयोर्विरोधः। प्रणिदीनइत्यादौतुभाष्यकृतासहइतरयोर्विरोधोद्रष्टव्यइतिदिक्। अ
जेस्वंकत्यांयथोत्तरंमुनीनांप्रामाण्यमितिसिद्धांत। द्वाष्योक्तरीत्यासर्वत्रदीङिपरेनेर्नित्यंणत्वमितिस्थितेसूत्रवार्त्तिकम

इदिङ्गतेरिवर्णान्तलक्षणस्यान्वीः भावोप्यकृत्पत्ययेजननिमित्तद्विर्भावस्मिन्निमित्तस्येकैस्वरः २

स्युरायोपगवः यणादयादीनां प्रत्ययाधुदात्तत्वं प्रवर्त्तते एवमिहाप्यणोपि। आप्यां यथा दत्ताभ्यामित्यादौ सुपि चेति दीर्घत्वं भव
ति। एवमिहापि। ईड् गतौ। दिवादिः। एयं। अयचोपरिति अजन्ता द्धातोर्विधीयमानो यत्प्रत्ययो यथा चेयं जेयमित्यादौ भवति तथेहा
पि। इणः स्तु एति स्तुहि इति क्यपि इत्यमित्येव रूपं न तु एयमिति। एकस्मिन्निति किं। सभासंन्नयने भवः साभासंनयनः। अत्र हि आको
रस्य आदित्वं सति तन्मेवाश्रित्य सभासन्नयनशब्दस्य वृद्धत्वं स्यात्। ततश्च अणं बाधित्वा वृद्धाच्छ इति छः प्रसज्येत। ननु त्यदादीसा
चामादिरिति सूत्रे आदिग्रहणसामर्थ्यादेव आवर्त्त्यं तत्सामर्थ्यादेव सभासन्नयनशब्दे वृद्धसंज्ञा न भविष्यतीति चेन्न। यदि हि वृद्धसं
ज्ञासूत्रे आदिग्रहणसामर्थ्यान्नातिदेशिकस्य मुख्यस्यैवादेर्ग्रहणं तर्हि जानातीति ज्ञा ज्ञाम्लार्ण इत्यादिरसहायोपि वृद्धो न स्या
त्। ततश्च ज्ञायाश्छ ज्ञीय इत्यादि न सिध्येत्। असति हि प्रकृतसूत्रस्थैकग्रहणे यत्र आदिव्यपदेशो मुख्यो नास्ति असहायमध्ये
ऽन्ते च तत्सर्वोपि विशेषाद्व्यतिदेशस्य विषयः स्यात्। यदि त्वतिदेशसामर्थ्याज्ज्ञाशब्दे वृद्धत्वं तर्हि विशेषात् सभासन्नयनेपि स्यात्।
वृद्धसंज्ञायामादिग्रहणं तर्हि व्यर्थमेवेति चेन्न। हंतैवं अतिदेशस्यादिग्रहणस्य च सामर्थ्यात्सर्वत्र विकल्पापत्तिः। इह एकग्रहणे
कृते तु अन्तमध्ययोर्वाचकत्वाद्वृद्धसंज्ञायामादिग्रहणं सार्थकमिति दिक्। ननु न्यासकृतो ऽतिदेशसूत्रे एकग्रहणाभावे वृ राम॰
द्धसंज्ञासूत्रस्थमादिग्रहणमनातिदेशिकप्रतिपत्त्यर्थं सत् असहायानां ज्ञादीनामेव वृद्धसंज्ञां वारयेत्। न तु सभासंनयनस्यास

उत्कर्षः सा आदिग्रहणेऽतिदेशात्सूत्रे एकग्रहणेपि कृतं सभासंनयनस्य वारणमित्यपि दूषणं बोध्यं २

न्नयने सेत्स्यतीति चेत् अत्राहुः अचोपेक्ष्य अनातिदेशिकस्यादित्वस्य तत्र सत्त्वादिति। तच्चिंत्यं। यस्मिन्सति पश्चाद्धवनिस्तिस
आदिरिति सिद्धांतरीत्या मध्यस्थेपि आदित्वविरहात्। इयानेव हि विशेषः। असहायेमत्यन्तविशेषणाविरहाद्विशिष्टाभावः मध्य
स्थे तु विशेष्याभावाद्विशिष्टाभाव इति। वार्त्तिककारस्तु लाघवादवर्त्त्वमात्रमादिशब्दस्य प्रवृत्तिनिमित्तं। अनुत्तरत्वमात्रेचां
तशब्दस्य। न तु सत्यन्यस्मिन्नित्यपि विशेषणं। गौरवात्। तथा चासहायेपि मुख्ययोरेवाद्यंतयोः संभव इति मन्वानः सूत्रमेतत्प्र
त्याचख्यौ। आह च अपृक्तेन तु त्वरलक्षणात्त्वाद्याद्यंतयोः सिद्धमेकस्मिन्निति। भाष्यकारस्तु नैतन्मेने। सत्यन्यस्मिन्निति विशेषण
प्रक्षेपप्रयुक्तस्य गौरवस्याप्रामाणिकत्वात्। लोके ह्ययमादिरंतो वेत्युक्ते अवशिष्टमपि किंचिदस्तीति नियमेन प्रतियंति। यदा च
यन्तोपस्थितिश्च शक्तिसाध्या। अनुभवमपलप्य एकदेशमात्रे शक्तिकल्पने तु प्रथमचरणादिपदानामपि लाघवात्प्राथम्यत्वमात्रं पिर
त्वमात्रं तद्वदेकपुंस्त्वमात्रं वा शक्यतावच्छेदकं स्यादिति विशिष्टविषयकशक्त्युच्छेदेन सकलशिष्टव्यवहारव्याकोपः स्यादिति। न
न्वेवमपि व्यपदेशिवद्वचनं कर्त्तव्यमेव। इयाय आरेत्यादौ धात्ववयवत्वं प्राप्य यण्एकाच्त्वाश्रितस्य द्वित्वं पञ्च स्यात्। एकाच इति हि वहु
व्रीहिरिति वक्ष्यते। ननु एवं रत्नेरयापादेशयोरैत्वस्य दद्दौ यदात्वेव कृते आप आहु इत्यनयोरेकाच्त्वं पचादेरिव सुखमेवास्तीति वा
च्यं। द्विर्वचनेचीति रूपातिदेशेन रञ्जनयोरेव हि रुत्कं। किंच यजेः पञ्चमे लकारे सद्देवान्यक्षद्विषितोपञ्जीयाश्रित्याद्यसि सिद्धं

अजेर्द्विर्वचनादेरोपायत्वेयव १

[illegible]

ग्रा० कौ० तं लेढीति लिट् । तस्य षत्वं व्यपदेशिवद्भावेनैव साध्यं । प्रत्ययस्य यः सकारस्तस्य षत्वमिति लिट् ह्यांतात् । तस्माद्व्यपदेशिवदेकस्मिन्निति
वक्तव्यं अतः किं प्रकृतसूत्रेण । व्यपदेशो नाम विशिष्टो मुख्यो व्यपदेशो व्यवहारः एकाजित्यादिः सोऽस्यास्तीति व्यपदेशी पञ्चिप्रभृतिः तस्मि
न्निवासहायेपि कार्यं स्यादित्यर्थः । अत्राह भाष्यकारः । अवचनाल्लोकविज्ञानात्सिद्धमिति । वचनं विनापि शास्त्रे लोकव्यवहारादेव व्य
पदेशिवद्भावसिद्धेरायंतवदिति व्यपदेशिवदिति चोभयमपि न सूत्रयितव्यमित्यर्थः । अस्ति हि लोके निरूढोयं व्यवहारः । अयमेव
मे ज्येष्ठः पुत्रोऽयमेव मध्यमोऽयमेव कनिष्ठ इति । तथा अस्य तापस सोऽप्यमाराणायां च प्रथमगर्भेण हतेति व्यवहरंति । तथा पूर्वमना
गतो अग्रे अनाजिगमिषुश्चाह । इदं मे प्रथममागमनमिति । ननु सर्वं इमे गौणा व्यवहाराः । तत्कथं मुख्ये चरितार्थं शास्त्रं गौ
णे प्रवर्तेतेति चेन्न । निरूढतरत्वेन गौणस्याप्यस्य मुख्यसमकक्षत्वात् । ज्ञापकाच्च । धात्वमिति दीति लिचोल्लोपं शास्ति तज्ज्ञा
पयति व्यपदेशिवदेकस्मिन्निति । न ह्यन्यथा इट् लभ्यते । वल् भूयत्वेपि वलादित्वविरहात् । दीर्घ इणः किति तास्यादीन्यपि ज्ञापका
नि । न हि व्यपदेशिवद्भावं विना गुणाभ्यासो लभ्यते इति दिक् । यत्तु कैयटेनार्थवता व्यपदेशिवद्भावात् करोते रुकारो वा का
रस्यानर्थकत्वेन तत्र दीर्घत्वासिद्धये आदिवद्भावो वचनेनैव साधनीय इति । अत्रेदं वक्तव्यं । अर्थवता व्यपदेशिवद्भाव इति राम०
तावन्न परिभाषा । तस्या विध्यंगत्वात् । व्यपदेशिवद्भावस्तु लौकिक इत्युक्तत्वात् तत्प्रति अंगत्वायोगात् । किंतु शास्त्रे व्यपदेशि

[illegible]

[illegible]

वद्भावयोजना परा हि अर्थसमुदायमाश्रित्य तस्य एकदेश इति व्युत्पत्त्यापि तु मर्थवत्ता ऽपेक्षिते तिपरं तत्सा ज्ञापः । अत एव ष
ष्ठे निजो च त्वार एकाच इत्येतस्मु सामान्य मरे भाष्ये कैयटेनानर्थकेनापि व्यपदेशिवद्भावः स्वीकृतः । लोकवच्छास्त्रेप्यनर्थ
कस्य व्यपदेशिवद्भावसंभवात् । तस्मादर्थवतेति प्रायोवादमात्रं । सूत्रमतारंभणं तु सम्प्रयोगे वेति दिक् ॥ ॥तरप्तमपौ घः । एतौ घ
संज्ञौ स्तः । कुमारितरा । कुमारितमा । घरूपेति ह्रस्वः । न घास्तीति न दीतर इत्यत्र तु न भवति । तमपा साहचर्येण प्रत्ययस्यैव तरपो
ग्रहणात् । पद्वातरविति रूपं तत्प्रधानं आश्रितं । न च परिनिष्ठिते प्रयोगे क्वापि नास्तीति ज्ञोपदेशिकेत्यत्ते स्वतरप् प्रत्ययस्ये
वास्ति । अपि च मतिपत्ती कोत्व मयीह सुलभं । तेनावयव ग्रेणो स्मुत्तादित्वेन दीतरेनातिप्रसंगः । केचित् समानाधिकरणे स्त्रीलिंगोप
रे ह्रस्वत्वं विधीयते । अन्यथा महिषीव रूपं महिषीरूपमिति सिद्धापि स्यात् । सुप्सुपेति समासः । रूपमाकृतिः । महिषीवेयमाकृ
तिरित्यर्थः । सामानाधिकरण्ये स्त्रीत्वे च स्वार्थिकत्वात् इति ज्ञापनिक स्यात्तः । न तु नदीतरे अनेनोक्तो दोषः । नन्वाति ज्ञा
पनिक प्रकरण एव तरीघरतिपितो घः इत्तीवाक्यपरत्वं लाघवादिति चेन्न । प्रकरणोत्कर्षे तो हि संज्ञाकरणस्यान्योपि नरवस्तीति ज्ञा
पनार्थत्वात् । सत्वानिर्दिष्टार्थत्वात् स्वार्थे भवतीति नाल्पा ह्रस्वं । लोपश्च बलवत्तर इत्यादि सिद्धं । केचित्तु सामान्ये प्रत्ययकमा
श्रित्य ईयसुनोपि स्वार्थिकतामाहुः । तेन श्रेयो महीयस्त्ववसाह सिंकप इत्यादि प्रयोगाः समर्थिता भवंति ॥ बहुगणवतुडति सं

[illegible]

ख्या। एते संख्यासंज्ञाः स्युः। बहुकृत्वः। संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्। बहुधा। संख्याया विधार्थे धा। बहुभिः क्रीतो ब
हुकः। संख्याया अतिशदन्तायाः कन्। बहुशः। बह्वल्पार्थाच्छस्कारकादित्यनुवर्त्तमाने संख्यैकवचनाच्च वीप्सायामिति शस्।
गणकृत्वः। गणधा। गणकः। गणशः। तावत्कृत्वः। तावद्धा। तावत्कः। तावच्छः। यत्तदेतेभ्यः परिमाणे वतुप्। आ सर्वनाम्नः। शेषं
प्राग्वत्। कतिकृत्वः। कतिधा। कतिकः। कतिशः। किमः संख्यापरिमाणे डति च। शेषं प्राग्वत्। प्रागेतत्। वैपुल्येपि बहुगणशब्दौ व
र्त्तेते। बहूनि हिमवानिति। संघे च गणशब्दः। भिक्षुकाणां गण इति। समवायश्च यो गण इत्यमरः। तथा च संघवैपुल्यवाचिनोरप्य
नयोः संख्यासंज्ञा स्यादिति चेन्न। संख्यायतेनयेत्यन्वर्थसंज्ञाविज्ञानात्। तस्मात्संख्यावाचिनोरेव बहुगणशब्दयोरिह ग्रह
णं। न चानियमार्थी। अनियतबहुत्ववाचिनां मध्ये अनयोरेव संख्यासंज्ञा न तु भूर्यादीनामिति। तेन बहुविषययोरेकयोर्नियतबहु
त्ववाचिनां त्र्यादीनां च न व्यावृत्तिः। ननु नियमार्थत्वे सिद्धे सजातीयापेक्षत्वान्नियमस्य तदुक्तव्यवस्था सिध्येत। नियमार्थत्वमेव तु दु म
रुपपादं विधेयर्थताया एवोचितत्वात्। तथाहि। अस्ति तावत्कृत्रिमाकृत्रिमयोः कृत्रिमकार्यसंप्रत्यय इति परिभाषा। सा च न्यायमू
ला। संज्ञाशास्त्रेण संज्ञिविशेषे नियम्यमानो हि संज्ञाशब्दः कथमितरेतरं बोधयेत्। एवं स्थिते बहुगणयोरिह ग्रहणाभावे संख्याप्र एम॰
देशेषु ग्रहणमेव न स्यात्। अकृत्रिमत्वात्। तस्मात्तत्संग्रहपरमेव बहुगणग्रहणं न तु भूर्यादिनिवृत्त्यर्थमिति। अन्ये तु। संज्ञिविशे

षे क्रियमाणः संज्ञानियमो यदि सामान्यापेक्षस्तदा पुनः। अकृत्रिमस्य व्यावृत्तिः। विशेषपरत्वे तु सजातीयं कृत्रिमान्तरमेव नियमेन व्या
वर्त्यते न त्वकृत्रिममपि। तदेतदुच्यते उभयगतिरिह शास्त्रे भवतीति। कृत्रिमाकृत्रिमयोरुभयोरपि ग्रहणमित्यर्थः। अस्ति च संख्याप्रदे
शेषूभयग्रहणे लिंगं। संख्याया अतिशदन्तायाः कन्निति सूत्रे शदन्तपर्युदासः। नहि कृत्रिमा संख्या शदन्तास्तीति दिक्। तेनयं वधा।।
पंचकृत्व इत्यादि सिद्धं भवतीति। यद्यपि संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्तीति तथापि बहुडत्योः केवलयोः संज्ञायाः प्रयोज
नाभावात् सामर्थ्यात्तदन्तग्रहणं। तद्धितविधौ हि ङ्याप्प्रातिपदिकादित्यधिकृतं। न च केवलस्य प्रत्ययस्य प्रातिपदिकत्वमस्तीति बो
ध्यं। एतच्च सूत्रं भाष्ये प्रत्याख्यातं। बहुपूगगणसंघस्य तिथुक् वतोरिथुक् षट्कतिकतिपयचतुरां थुगिति सूत्रैः डटि ये आगमा वि
धीयमाना बहुप्रभृतीनां डटो निर्वाहकं संख्यात्वं ज्ञापयन्तीति किमनेन सूत्रेण। ननु बहुपूगगणसंघेषु डटो विशेषाश्रवणात् संघ
वैपुल्यवाचिनोरपि बहुगणशब्दयोः संख्याकार्यं स्यादिति चेन्न। अनियतसंख्यावाचिनोरप्येतयोः संख्याकार्यं भवतीत्येतावन्मा
त्रज्ञापने न चरितार्थत्वे सति सर्वथा संख्यामप्रतिपादयतोरपि संख्याकार्यकल्पनस्य गौरवपराहतत्वात्। भूर्यादीनां तु अनिय
तसंख्यावाचिनां ग्रहणं न भवति। नियतसंख्यावाचिनां पंचादीनामेव लोके संख्याशब्दत्वेन प्रसिद्धतरत्वात्। प्रसिद्धाप्रसिद्धयोः
प्रसिद्धग्रहणस्यैव न्याय्यत्वात्। नन्वेवमपि बहुगणयोरिव पूगसंघादीनामपि धाशस्कृत्वसुजादिसंख्याकार्यप्रसंगः। न च बहुग

श॰ टी॰

गणेः सामान्यापेक्षं ज्ञापकं पूर्णादीनां तु द्विषयकमेवेति वाच्यं। अनुपपत्तेः समानत्वेन एकसूत्रोपात्तत्वेन च वैषम्ये बीजाभावादिति चे
न्नैवं। लक्ष्यानुरोधेन कचित्सामान्यापेक्षं कचिच्च विशेषापेक्षं ज्ञापकमित्याश्रयणात्। तदनुरोधेन वैरूप्यस्य सोढव्यत्वादिति दिक्।
शाणं कुडविम सहमानेनैव सूत्रकृता सूत्रमिदं प्रणीतमिति तु परमार्थः। अत्र वार्त्तिकानि। अध्यर्द्धग्रहणं च समासकन्विध्यर्थं।
अर्द्धेनाधिकं अध्यर्द्धं। एकदेशवाचकोयमर्द्धशब्दः। तस्य अधिशब्देन समासे कृते यौगिकार्थः प्रतीयते न तु संख्येति वार्त्ति
कारंभः। अध्यर्द्धेन शूर्पेण क्रीतं अध्यर्द्धशूर्पं। टिठन्नं ख्येरित्यनुवर्त्तमाने तद्धितार्थेति समासः। ततः शूर्पादञन्यतरस्यामि
ति अञ्। ठञो वा अध्यर्द्धपूर्वेति लुक्। अध्यर्द्धेन क्रीतमध्यर्द्धकं। संख्याया अतिशदंतायाः कन्निति कन्। इह समासविध्य
र्थमिति संबंधसामान्ये षष्ठी। समासे विधीयमाने समासनिमित्ते वा अन्यस्मिन्कार्ये विधीयमाने इत्यर्थः। तेन द्विगुनिमित्तो लु
गपि लभ्यते। तथा चाध्यर्द्धपूर्वेति सूत्रे अध्यर्द्धस्य ग्रहणं न कर्त्तव्यं भवति। तदुक्तं। लुकि चाग्रहणमिति। अर्द्धपूर्वपद
श्च पूरणप्रत्ययांतः। संख्येत्यनुवर्त्तते। पूरणप्रत्ययांतस्य पूरणप्रत्ययांतो र्द्धपदे इत्यर्थः। समासकन्विध्यर्थमित्येव। अ
र्द्धपंचमं येषामिति बहुव्रीहिः। अर्द्धपंचमैः शूर्पैः क्रीतं अर्द्धपंचमशूर्पं। एवं च ठञ आर्षो वा लुक्। अर्द्धपं १५०
चमेन क्रीतं अर्द्धपंचमकं। अधिकग्रहणं चालुकि समासोत्तरपदवृद्ध्यर्थं। अधिकषाष्टिकाः क्रीतः अधिकषाष्टिकः। अ

पूरणप्रत्ययांतस्यार्धशब्देन तत्प्रकृतेरिति

धिकषाष्टिकः। तद्धितार्थेति समासः। प्राग्वतेष्ठञ्। अलुकीति वचनाल्लुकि कर्त्तव्ये संख्यासंज्ञा नास्तीति द्विगुत्वमपि नेति नाध्य
र्द्धपूर्वद्विगोरिति लुक्। ततः संख्यायाः संवत्सरसंख्यस्य चेत्युत्तरपदवृद्धिः। ननु लुकीत्यर्थे। उत्तरपदवृद्ध्यर्थमिति वचनादेव लुग
भावस्य आक्षेप्तुं शक्यत्वादिति चेन्न। अर्द्धेर्दशशब्दस्य प्रयोगे च येषु येषु प्रत्ययाः तेषां लुगप्राप्त्या तत्रैवोत्तरपदवृद्धेः सावकाशत्वात्। ष्णा
न्ता षट्। षांता नांता च संख्या षट्संज्ञा स्यात्। षट् तिष्ठंति। षट् पश्य। पंच सप्त नव दश। संख्येति किं विप्रुषः पामानः। ननु शतानि सहस्रा
णीत्यत्र नुमि कृते तस्यापि एवं भक्तत्वान्नांता संख्येति षट्संज्ञा स्यादिति चेदस्तु न चैवं षड्भ्यो लुगिति लुक् स्यादिति वाच्यं। सर्वनामस्था
नसंनिपातेन कृतस्य नुमः तद्विघातकत्वात्। नन्वेवमपि अष्टानामिति न सिध्यति। तथा हि। अष्टन् आमिति स्थिते परत्वान्नि
त्यत्वाच्च अष्टन आ [redacted] विभक्तावित्यात्वे कृते अनांतत्वात् संज्ञायामसत्यां षट्चतुर्भ्यश्चेति नुडप्राप्तो तीति चेन्न। यथोद्दे
शपक्षे आत्वात्प्रागेव षट्संज्ञा। अंतरंगत्वात्। ततः कृतेप्यात्वे एकदेशविकृतस्यानन्यत्वात् षट्संज्ञकत्वेन नुटः सिद्धत्वात्।
कार्यकालपक्षे तु हि उक्तदोषस्तदवस्थ एव। किंच यथोद्देशपक्ष विधित्वादतिदेशो दुर्लभः। अत एव वज्रश्चेत्यत्रचः परस्मिन्नि
त्यस्य फलमिति कैयटः इति चेन्न। अष्टनो दीर्घादिति दीर्घग्रहणेन कृतात्वस्यापि षट्संज्ञाज्ञापनात्। तथा हि। त्रेः संख्याया इत्या
दुदात्तत्वं बाधित्वा षट्त्रिपादादंतोदात्तो शब्दः साधितः। तस्माद्भिसि अष्टभिः अष्टाभिरिति रूपद्वयं। तत्र आत्वाभावे मध्यो

३१

श·श·कौ· दान्तं आत्वपक्षे त्वंतोदात्तमिति सिद्धान्तः। तत्र षट्त्रिचतुर्भ्यो हलादिरिति सूत्रेण षण्णां षड्भिरित्यादावपि विभक्तेरुदात्तत्वं प्राप्तं तद्बाधित्वा
झल्युपोत्तममिति प्राप्तं। षट्त्रिचतुर्भ्यो यो झलादिर्विभक्तिस्तदन्ते पदे उपोत्तममुदात्तं भवतीति हि तस्यार्थः। तद्बाधनाय अष्टनो दीर्घादि
त्याप्यते। दीर्घान्तादष्टनः परा असर्वनामस्थाना विभक्तिरुदात्ता भवतीति सूत्रस्यार्थः। तत्र यथा आत्वपक्षे षट्संज्ञा न स्यात तर्हि तत्र साव
काशोऽयं अष्टनः स्वरः परत्वादात्वाभावपक्षे झल्युपोत्तममिति षट्स्वरेण बाध्येत इति किं दीर्घग्रहणेन। कृतात्वस्यापि षट्संज्ञायां
सत्यां तु षट्स्वरस्याष्टनः स्वरोऽपवादः संपद्यते। न चाष्टनः स्वरः ऋमिसावकाश इति वाच्यं। तत्रैकादेश उदात्तेनोदात्त इत्यस्य ✕ तौस्यादिति
तथा च स्वर्यं क्रियमाणं दीर्घग्रहणं सार्थकमेव। तस्माद्दीर्घग्रहणेन आत्वपक्षे षट्संज्ञेति + इति सूत्रे णौवगतार्थत्वात्। अष्ट
नो दीर्घात्तोदात्त इति समनंतरमेवोक्तत्वात्। तेन दीर्घपक्षे इव तदभावपक्षेऽपि विभक्तेरुदात्तत्वं ✕ ज्ञाप्यत इति स्थितं। न चै
ज्ञापक वं दीर्घग्रहणस्यात्र वैकल्पिकत्वं न स्यादिति वाच्यं उभयज्ञापकत्वसंभवात्। न ह्येकेनैकमेव ज्ञाप्यत इति नियमः। यावता वि
नाऽनुपपत्तिस्तावतो ज्ञाप्यत्वात्। तच्चैकमनेकं वेत्यन्यदेतत्। प्रकृते च उभयं विना दीर्घग्रहणवैयर्थ्यानुपपत्तेरिति दिक्।
आर परि तु छाः षकारान्ता नकारान्ताश्च ते षट्संज्ञाः स्युरिति प्रकृतसूत्र एव आकारोऽपि प्रश्लिष्येत। तेन द्वाभ्यामित्यत्र षट्त्रिचतुर्भ्यो राम०
हलादिरिति विभक्तेरुदात्तत्वं स्यात्। आ द्वाभ्यां हरिभ्यामिति द्वयादीनां त्यादेरा घुदात्तमेव तु द्वाभ्यामिति पठ्यते। तस्मादिह आका

आदिनानभवात्स्यूत्कुपोत्तममित्यस्याप्राप्तेरिति भावः १ पं·२

वैकल्पिकमात्वं अष्टनो भाषायां

रप्रश्लेषेण वर्णनीयः। किं तत्प्रकारः एवाऽष्टन इति स्थितं। तथा सत्यमेव योगविभागं कृत्वात् झलोनापि द्वैधाभाव्यमेषामापादितं तथाहि।
षड्भ्यो लुगित्यत्र षड्भ्य इति विभज्यते। अष्टाभ्य औशिति सूत्राद् अष्टाभ्य इत्यनुवर्तते। तेन षड्भ्यो यदुक्तं तत्कृताकारादष्टनोऽपि तत्स्यादिति सूत्रार्थः।
न चैवं जश्शसोर्लुगप्यति दिक्षपेतेति वाच्यं। औश्त्वविधिवैयर्थ्यापत्तेः। अथवा अष्टन आ विभक्तौ इत्यस्मादनंतरं एव इति योगविभ
६ क्तः। लुभयोपि शियोः औशोऽयमाक्षेपः। तेनाऽष्टानामित्यत्र नुटः पश्चादेवात्वं न तु प्राक्। न चैवं जश्शसोरात्वं न स्यादिति वाच्यं। लाघवा
पि महर्षिभिः तिनिर्दिष्टत्वे अष्टाभ्य औशिति कृतात्वनिर्देशेन जश्शसोर्विषये आत्वानुमानात्। यत्रात्वं तत्रैवौश्त्वं यथा स्यादित्येतद
र्यहितत्र दीर्घोच्चारणं कृतमिति। स्यादेतत्। हलीति यद्युभयोः शेषस्तर्हि प्रियाष्टन् आ छे औजसमौ टाङसिङेङसिङ सोसाम्सुवेक
अष्टाभ्यऔ श ल्पिकं तयेष्यमाणमात्वं न सिध्येत। न चात्र आत्वं नेष्यत एवेति वाच्यं। इतः प्राचीनपक्षाणामतिप्रसंगात्। तेषु हि आत्वं प्रा प्रियाष्टन
प्तमेव। विभक्तिमात्रे तद्विधानात्। न च षड्भ्यो लुक् षट्चतुर्भ्यश्चेति सूत्राभ्यां विधीयमानो लुड् नुड् यथा गौणानां न स्यात्तथा आत्व
मपि न स्यादेवेति वाच्यं। वैषम्यात्। लुग्नुटोर्विधौ हि षड्भ्य इति षट्चतुर्भ्य इति च बहुवचननिर्देशात् उर्थप्रधानत्वमेव तत्प्रवर्तते। आत्व
विधौ तु अष्टन इत्येकवचननिर्देशाद्गौणत्वेऽपि प्रियाष्टाभ्यामित्यादावात्वं प्रवर्तत एव। पदांगाधिकारे तस्य तदन्तस्य च इति वचनमाण
त्वात्। न च जश्शसोरष्टाभ्य औशिति कृतात्वनिर्देशेनानुमीयमानमात्वं केवलेऽप्राधान्ये च अष्टन्शब्दे परमाष्टावित्यत्र यथा भवत्येवं गौणत्वेऽपि

आतोलोपः कि इतिवत्

शा·सू·कौ· भविष्यतीति तत् संज्ञेनानुपपत्तिरिति वाच्यं। ओम्‌आङोः हि लुग्नुरादिवद् गौणत्वेन भवति। अम्‌आङ् इति बहुवचननिर्देशात्। अन्यथा हि लक्ताल्ल
नुकरणोपि एकवचनेनैव निर्दिश्येत। अत्राप्योऽशिति अप्युत् इति वा। स्पष्टं चैतदिहैव सूत्रे भाष्यकैयटयोः। तथा च ओम्‌आङ्‌विधौ लक्तात्वनि
र्देशबलेनानुमीयमानमात्वमपि प्राधान्यएवस्यान्नतु गौणतायामिति तत्संज्ञोप्यनुपपत्तिसाम्यात्। तस्मात्। हलीत्युभयत्र दोषश्चेत्समारा
त्वं प्रियाष्टनः। राङ् उ। सिङ् सोमात्सुतथैवोज्जसमीदृशाः। मागुर्कै बहुषु भवेदात्वममीषपि। फलभेदेमहत्त्वेवं कथं पक्षविकल्प
ना। अत्रोच्यते। प्रियाष्टन् शब्दस्य अजादावात्वमनिष्टमेव। हलीत्युभयोः दोषस्य भाष्ये एव सिद्धान्तितत्वात्। तथा सति ओजसोः क्रमेण
प्रियाष्टानो प्रियाष्टानः इत्येव रूपं स्यान्नतु प्रियाष्टो प्रियाष्टाः इत्यपि। तत्र शंक्यं यथालक्षणमप्रयुक्ते इत्यभिहितत्वाच्च। अतएव यथालक्ष
णमिति प्रतीकमुपादाय न भवत्येवात्वमित्यर्थ इति कैयटो व्याख्यत्। एवं स्थिते प्राचीनाः पक्षा अपरितोषग्रस्ता एव। व्यवस्थितं
विभाषया गौणतायामजादिषु आत्वं न भवतीत्याशयेन वा योज्याः। उक्तान्हतभाष्यकैयटप्रामाण्यात्। तस्मात्प्रियाष्टः सर्वेषु वचने
षु राजन् शब्दसाधारण्यं रूपं हलादौ तु हाहा शब्दसाधारणमपरं रूपं। औशत्तु रोसुप्राप्तिरेवनास्तीति प्रामाणिकः पंथाः। अतएव
रीरीति सर्वनामानीति सूत्रे हरदत्तेन गौणत्वे औशत्र भवतीति स्पष्टमेवाभिहितं। अतएवाप्यात्म औशितिसूत्रे तदन्तग्रहणमत्र राम·
वाते। परमाष्टौ इत्युक्ता प्रियाष्टान इत्यत्रात्वस्याभावादौश्त्र भवतीति काशिकासंगच्छते। अतएव च अष्टनआविभक्ताविति सूत्रे तद

शाविंहरूपं १ दीर्घात्तिशापकात्

तद्विधिस्थात्रेष्यते। प्रियाष्टा औडीप स्त्रियांप्याष्टा इत्यपि यथा स्यादिति काशिकाग्रंथोपि संगच्छते हलादावात्वस्य निर्बाधत्वात्। स्यादेतत् नस्तु
अष्टाभ्य औशितिसूत्रे प्रियाष्टान इत्यत्रेति हरिग्रंथमुपादाय। यथापुनर्गौणतायामात्वं न भवति तथा न हि धावेव वक्ष्यत इति प्रतिज्ञाप
अष्टन आविभक्ताविति सूत्रे एकवचननिर्देशाद्विस्वस्य स्वग्रहणं न्यायसिद्धा। तेनोपसर्जनेप्यष्टनि भवति। तत्रापि विकल्पितत्वात् प्रियाष्टा
प्रियाष्टानौ प्रियाष्टान इत्यपि भवति। तत्राप्यात्वपक्षे भसंज्ञाविषये आतो लोप मिच्छन्ति। प्रियाष्टः पश्य प्रियाष्टा इत्यात्वाभावपक्षे अल्लोपे
कृते प्रियाष्ट्णः इति भवतीत्यनेनग्रंथेन एवं प्रतिज्ञातार्थविषये न भाष्यवृत्त्यादिविरुद्धं च कथमभिहितवानिति तत्स्यान्वयापंसएव प्रष्टव्याः।
अल्लोपे कृते मित्यपि तदुक्तिर्भ्रिष्टैव। एवं स्मात् दृपिविधाव लोपस्य स्थानिवद्भावेन ष्टुत्वायोगात्। न च एवं त्रासिद्धीयेन स्थानिवदिति नि
षेधः। तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति सापवादत्वात्। ननु रषाभ्यांनोणः इति मति पदोक्तं णत्वं तत्र गृह्यते न तु ष्टुत्व तल्लभ्य
मपि। विलंबितप्रतीतिकत्वादिति चेन्न। अपदान्तस्य मूर्धन्यः इति सूत्रं संस्करिषाभ्यामिति सूत्रे नुवर्त्य तत्र तस्मादग्रहणस्य पदान्तस्येति
निषेधसूत्रस्य च भाष्ये प्रत्याख्यातत्वात्। यथोक्तांसुनीनां प्रामाण्यात्। न च मूर्द्धन्य शब्देन ष्टु शब्देन वा निर्वर्तमाने गौरवेषम्य
मस्ति। सूत्रकारीत्या कथंचित्संभवन्नपिस्यापोत्र भाष्यानुरोधात्सम्यगेव। तथा च शर्पूर्वाः खय इति सूत्रे खर्पूर्वे ग्रहणं कर्त
व्यमिति वार्तिकं प्रसाव ष्टाणो भगवान्नाह। अभ्यासजश्त्व चर्त्वमिति सूत्रमित्येव। एतत्तु ग्रहणमकर्तव्यमिति। न चा चतु केप्यतेन
वस्तुतः सूत्रमेत ... ... बोधन
... ... २

हलादिः शेषेकर्तव्ये मि?

निष्पन्नस्य चकारस्यापि वर्त्तने सिद्धत्वात् उचिच्छिषतीति रूपं सिद्धमिति तदाशयः कैयटेन वर्णितः। न त्वेवं प्रियाष्ट इत्यादेवरूपमु
चितं। न चैवं प्रस्थ इत्यादावपि तत्कारएव प्राप्नोतेतिवाच्यं। तत्रापि रङ्घाज्ज्ञि ति सूत्रेण णत्वप्रवृत्तेरनिर्दिक्।। ।।डति च।। डसंतातसं
ख्यावड्संज्ञास्यात्। कतिसंति।। कत्यद्राक्षीः षट्‌त्वा जश्त्वाससीलुक्। संख्येति किं। पातेर्डतिः। पतयः। नन्वास्य संख्यासंज्ञाविधानादि
ति वाच्यं। वतुसाहचर्येण तत्र तद्धितस्यैवग्रहणात्। इदं सूत्रमप्रत्याख्यातं भाष्ये। बहुगणवतुडति संख्या। डति। संख्येत्यनुवर्त्तते।
ततः ष्णांताषट्। संख्या अतीत्युभयमनुवर्त्तते। एवं च सूत्रेष्वन्वर्थसंज्ञाविज्ञानात् संख्याप्रश्नविषयस्यैव डतेर्ग्रहणं न त्वौपाधि
कस्येति। क्तक्तवतू निष्ठा। एतौ निष्ठासंज्ञौ स्तः। कृतः। कृतवान्। ननु विहितयोः प्रत्यययोरनेन संज्ञा। संज्ञया च विधानं वस्व
तिहित्ततीयो निष्ठेति। तथा वान्तो यात्प्रत्यय इति चेन्न सूत्रद्वयात् दृष्टकृदवृष्टविसंज्ञाविज्ञानात्। तौ भूतेकालेभवतः। पयोर्विहितयोर्नि
ष्ठेसेषा संज्ञा भविष्यतीति। स्यादेतत्। अनुबंधाः कार्यार्थमुपादीयंते। न तु श्रवणार्थाः तेषां लोपविधानात्। तथा च लुप्तानुबं
धस्य परिनिष्ठितस्य प्रत्ययस्यारूप्यते तत्र क्वानुबंधकार्यं भवतु क्तवान इति निष्ठेतु मत्वा वाच्यं। न च ककारादिवदुपलक्षणस्यापि व्या
वर्त्तकता भविष्यतीति वाच्यं। काकादिनापि हि वेदिकापुंडरीकादिषु स्थितिः किंचित्कालं प्राप्यते। तद्धला बहूडीनपिका केव्य
वहारेण संकीर्यते। न चेह परिस्थितान्तरमुपलभ्यते। क्तप्रत्ययतन्मत्प्रत्यययोः काकादिकल्पो हि ककारनकारो। तदयं गमे संदेहे
मत्वा किंचिद्विशेषणस्यंबर्तमानतया मानिपात्रेतत्रातद्दिनाषमालेनवर्वात्यतेः स्पदालवरत्मा। ननयातदेपलक्षणतेनातिवाधंनं

तद्रूपत्वपरीक्षेपस्यपुरस्सरत्वात् तस्य दुर्वचत्वादिति। अत्राहुः। कालकारकविशेषादयो यथा वान्तवेदिकापुंडरीकादिस्थितावपलक्षः।
तद्दर्शनाच्चानुबंधस्मृतौ सत्यां तत्र प्रयुक्तं कार्यं साधुतया ज्ञायते। तथा लू नः श्नालिरिति केनचित्प्रयुक्ते लक्षणेन कर्मणि क्तक
वलात् क्तप्रत्ययोयमिति निर्णीयते। लोतमालभेतेति प्रयुक्ते तु मेषवाची लोतशब्दस्तन्प्रत्ययांतः प्रयुक्त इति निर्णीयते। हरि
मृगिराग्वामिष्टमित्र एष्वविभ्यश्छान्दसुणादिसूत्रात्। लोतस्य ष्टश्च भ्विवृंपोरिति तु पंचपादीस्थौ नो स्थितं। तथा प्राभिन्नघटे दे
वदत्तादि प्रयोगे कर्तृकतावघवगमाद्युः। तस्यायंप्रयोगो न तु निष्ठान्तस्येति निर्णीयते। स्यादेतत्। ञिजिघृस्निम्यः क्तः इति क्तप्र
त्ययेन क्तघृतं सिक्तमिति व्युत्पादितं। तत्रापि निष्ठासंज्ञा स्यात्। ततश्च निष्ठा च द्व्यजनादिति स्वरः स्यात्। निष्ठांतं चक्तसंज्ञायामा
द्युदात्तं स्यात् स चेष्टः इष्टकारेणेति सूत्रार्थः। न चेष्टापत्तिः। घृतंमिमिक्षइत्यादावंतोदात्तस्यैव पठ्यमानत्वादिति। अत्राहुः। अतः क्र
कमीति सूत्रे कमिग्रहणेन वसि हे कंसग्रहणेन ज्ञापितं। उणादयः क्वचिद्युत्पत्तिकार्यं न लभंते इति। अतो नात्र निष्ठासंज्ञेति न्याय
प्रघ्नतादीनां चेति फिट्सूत्रेण सिद्धं।। ।।इतिश्रीमच्छब्दकौस्तुभे प्रथमाध्यायस्य प्रथमे पादे पंचममाह्निकं।। ।।सर्वादी
नि सर्वनामानि। एतानि सर्वनामसंज्ञानि स्युः। तद्गुणसंविज्ञानोयं बहुव्रीहिः। तस्मात्स्य दार्थस्य गुणानां वर्जितपदार्थरूपाणा
विशेषणानां कार्यान्वयित्वात् संविज्ञानं यत्र स तद्गुणसंविज्ञानः। तत्र सर्वशब्दादिर्येषां तानीति विग्रहः। तद्धत्प्रयोगेगणान्यपूर्व

३५

[illegible]

शु॰ कौ॰

र्थप्राधान्यं लभ्यते। एवं चित्रगाव्योयस्य इत्यादावपि। अन्यथा हि यस्य गावश्चित्रा इति गोशब्दार्थप्राधान्यं स्यात्। न चैवं विधेयं
बहुव्रीहिरिष्यते। यत्तु वृत्तिवाक्ययोर्विशेष्यैक्यसंयत्नेपि चित्रगुणां गावामयमित्यादि विग्रहस्वर्णनं मीमांसावार्त्तिके कृतं तन्न मुने
ऊ२ निवचसामनुकूलं। अप्रथमाविभक्त्यर्थे बहुव्रीहिरिति वार्त्तिकावस्य मानत्वात्। भाष्ये तु न च शेषे बहुव्रीहिरिति सूत्रे त्रिकृतः शे
षमास्त्रिसप्तमी रेशोक्तसार्थस्य साधितत्वात्। द्वितीयाश्रितातीतादिभिः। तृतीया तत्कृतार्थेनेत्यादिक्रमेणादिव समस्त्रिकाणां
समास उक्तः। न द्वेषेण्यानोक्त प्रथमा इत्यस्य चिकः। तस्यैव बहुव्रीहिसंज्ञेति शेषेदेवेगतः। त्यादेरिव चित्रगुणां गावामित्यस्यापि द्वितीयास्तं
बहुव्रीहित्वं। किंच मत्वर्थे बहुव्रीहिरिति कात्यायनवचनात्कथं चित्रगुणां गावामित्यत्र तत्प्रसक्तिः। ननु दंडीत्यादावपि दंड इत्यस्य
मितिविग्रहाभ्युपगमादस्त्वन्यत्रापि एवमत्वर्थ इति चेन्न हि सुतरां मुनिवचनविरोधः। तदस्यास्त्यस्मिन्निति सूत्रेण प्रथमान्तात्
स्वपदाधिकारात्तिबंधिनिमित्तु विधानात्। समर्थानां प्रथमाद्वेति सूत्रेण प्रथमनिर्दिष्टस्यैव प्रकृतितावधारणाच्च। नन्वेतत्स्यपि सूत्रे
न वार्त्तिकभाष्यस्वरसिकं कथं [illegible] व्याम इति चेत्। समर्थः पदविधिरित्यादौ निष्ठीहितिर्यं जेतेत्वादि सुपदे विधि [illegible]
पितामासमर्थ्यं भाष्यादिसंमता द्वयरीतमेकवर्णायनभगादृशोनिरं कुशः किं किं न कुर्यात्। किंतु व्याकरणाधिकरणे सिद्धांतितत्वा रामः
कारणप्रामाण्यं कथंचित्स्वरूपाप्याकुलयसीति पर्यनुयोगे समाधानं विभावय। तस्मात्चित्रगाव्योयस्य स एव विग्रहः। सकलशि

[illegible]

सं प्रदायसिद्धो मुनित्रयवचसामनुकूलश्चेति दिक्। आदि शब्दस्यावयववाचित्वाद् उद्भूतावयवभेदः समुदायः समासार्थः। तस्य च
समुदायस्य युगपल्लक्ष्ये प्रयोगाभावादात्मर्थस्यात्तद्गेषिति न्यायेन तद्वयवेषु प्रवर्त्तमाना सर्वनामसंज्ञा अविशेषात्सर्वशब्दे
पि प्रवर्त्तते इति युक्तं तद्गुणसंविज्ञानत्वं। हलिसर्वेषामित्यादिनिर्देशा अन्हलिंगं। नक्षित्यादयः षड् इति सूत्रे तु जश्शुद्रति
योगं विभज्य जश्शेः। संज्ञाविधानसामर्थ्यादेव इत्स्यरत्नातद्गुणसंविज्ञानो बहुव्रीहिः। एतेन कतंतेभ्यः केशवादिभ्य इत्युभय
त्रापि शाकलन्नाह्वसंग्रहार्थं यथा तस्य पुरुषबहुव्रीह्योरेकशेष इति वक्तुं र्थवक्ष्यतेन तथेहापि न पुंसकमनपुंसकेनेति वास्य
रभिलानां यस्योत्रः स्वरविधिः स शिष्यते इति गात्स्य पुरुषबहुव्रीह्योः सहविवक्षायां बहुव्रीहेः शेष इति परास्तं। तद्गुण
संविज्ञानबहुव्रीहित्वे सर्वशब्दस्यापि संयुहेसिद्धे एकशेषाश्रयणस्य गौरवपराहतत्वात्। महासंज्ञाकरणमन्वर्थसंज्ञा
प्राधान्येनेत्यादि४ विज्ञानार्थं। सर्वेषां नामानीति। तत्सामर्थ्याच्च सर्वाभिधानसामर्थ्यविशिष्टानामेव संज्ञित्वमनुमीयते। तथा च तथा भूतानां
गणपाठस्यानुपकृतत्वात्प्रकारांतराणां च पाठप्रमाणाभावादेव विशेषे उपस्थितानां संज्ञानामुपसर्जनानां च सर्वादित्वमेव
नास्ति। तेन तेषां गणकार्यं संज्ञाप्रयुक्तकार्यं चेत्युभयमपि न भवति। गणकार्यं यथा। त्यदादीनामः। तदूनामकश्चित्। अति
क्रांतस्तं अतितेत्। तथा अरुतराश्चिप। अन्यमतिक्रांतमत्यन्यं। अतिकतरं। संज्ञाप्रयुक्तं यथा। सर्वनाम्नः स्मै। अतिसर्वाय।
सर्वनामत्वाभावात्साधारणं सर्वादीनामनुकार्येभ्यः सिद्धे ४

उपसर्जनप्रतिषेध इति वार्त्तिके विसंवादि ... तस्याश्रयस्य ... उपसर्जनस्योपसर्जनत्वस्य च प्रतिषेधः क्रियत इति भावः

बुद्धिस्थत्वं

श॰र॰को॰ तदेतदभिप्रेत्योक्तं वार्त्तिककृता संज्ञोपसर्जनप्रतिषेधः। पाठात्पर्युदासः पठितानां संज्ञाकरणमिति। तस्मात्प्रसिद्धेन प्रवृत्तिनिमित्तेन प्र
युक्त इतरं प्रत्यनुपसर्जनीभूत एवेह संज्ञीति स्थितं। यत्तु स्वरूपमात्रमर्पकार्यं न तु गुणपाठे संज्ञां वाऽपेक्षते। यथा पुष्परसमध्वं ऽसो
ऽइत्यादि तदुपसर्जने विधिर्भवत्येवेत्यवधेयं। नन्वेवं पुष्पयुष्मदेरित्यादावपि तन्मादिप्रसंगः। लोकप्रसिद्धार्थपरतायामेव तत्प्रवृत्तेः
अभिव्यक्तपदार्था ये इति न्यायात्। तदन्तग्रहणमत्र बोद्धव्यं। ह्रदं द्वे चेति ज्ञापकात्। तच्चैतत्तत्रैव वक्ष्यते। प्रयोजनं सर्वनामाव्यय
संज्ञायामिति वार्त्तिकवचनाच्च। तेन परमसर्वतः परमसर्वत्र परमसर्वके इत्यत्र समस्तात्तसिल्त्रल्अकच्च सिध्यति। न च तसिला
दिविधौ प्रातिपदिकादित्यनुवृत्तेः सर्वनाम्ना च तद्विशेषणात्तदन्तविधिर्भविष्यतीति वाच्यं। समासप्रत्ययविधौ न तदन्तविधिरिति नि
षेधात्। न चैवमतिसर्वायेत्यादावपि प्रसंगः। उपसर्जनपर्युदासस्योक्तत्वात्। अत एव परमसर्वस्मा इत्यादौ स्मायादयो भवंत्येवास्मा
देतत्। असः अतस्मिन्ननेनेय इत्यादावपि अत्वसत्वस्मिन्नादीनि न स्युः। अतिसर्व इत्यत्रेव उपसर्जनत्वात्। तथा च अब्राह्मण इत्या
दे ब्राह्मणभिन्न इत्यादिक्रमेणोत्तरपदार्थप्राधान्येन विवरणं कुर्वंति। सत्यं। वैय्याकरणमतेन नञ्समासस्योत्तरपदार्थप्राधान्यमे
वा नञ्सूत्रे भाष्यकारेण तथैवाभिहितत्वात्। तथा हि। आरोपितत्वं नञर्थः। तथा च मायामनुष्यमाणमगणाजनिशाकर राम॰
कपटब्राह्मणादिशब्देभ्य इवारोपितो मिथ्याभूतोऽयं ब्राह्मण इत्येवं शाब्दबोधपर्यवसाने ब्राह्मणभिन्न इत्यादिकमार्थिकार्थ

संज्ञात्वतानिवारणार्थत्वेऽपि बोध्यं अन्यथा अस्वाभाव्येऽश्व आदिलोपस्यात्।

विवरणं न तु शाब्दोपमर्थः। अत एव एतत्तदोरिति सूत्रे अनञ्समास इति सार्थकं। अत एव चाश्रौत्सर्गिकी तत्पुरुषस्योत्तरपदा
र्थप्रधानता पि निर्वहतीत्यादिक्। ननु यदीह तदन्तविधिरिष्टस्तर्हि भाष्यविरोधः। तत्र हि संज्ञोपसर्जनप्रतिषेध इति वार्त्तिकस्य प्रत्या
ख्यानमुपक्रम्य। अर्थद्वारकं विभक्तिविशेषणमाश्रित्यातिप्रसंग उद्धृतः। सर्वनामार्थसमवेतसंख्याकारकाद्यभिधायिनो ङेः स्मै
स्मादि साधिना उक्तरीत्या तदन्तविधौ सति तु अतिसर्वायेत्यादौ समुदायस्य सर्वनामत्वात् अर्थद्वारकविभक्तियोगाश्रयणेऽपि
स्मायादिप्रसंगस्तदवस्थ एव स्यादिति चेत्सत्यं। अत एवापरितोषाद्भाष्ये अथवा महतीयं संज्ञा क्रियत इति पक्षांतरमुपन्यस्तमिति
गृहाण। ननु यदीयमन्वर्थसंज्ञा तर्हि पूर्वपदात्संज्ञायामग इति णत्वं स्यादिति चेत्सत्यं। अत एव निपातनाण्णत्वाभावः सर्वण
त्वं तु रूपमसाध्वेव निपातनेन णत्वशास्त्रस्य बाधितत्वात्। अत एव शाप्ववृत्तिकृत् इत्याद्यपि असाध्वेव। येषां च विरोधः शाश्वतिक
इति निपातनेन इस्वसुस्त्वोक्तो तादित्वस्य बाधितत्वात्। नन्वेवमपरस्पराः क्रियासातत्ये इति निपातनेन संततशब्दो बाध्येतेति चे
न्न। तत्र सातत्य इत्यनेन एकदेशानुमतिद्वारा लुम्पेदवश्यमः कृत्ये इति पूर्वाचार्यपठितस्य मन्तो कस्येव त्राणात्। नन्वेवमपि पुरा
णप्रोक्तेषु ब्राह्मणकल्पेष्विति पुराणशब्देन पुरातनशब्दस्य बाधः प्राप्नोति। सत्यं। पृषोदरादिषु पुरातनशब्दस्य पाठो बोद्ध
व्यः। आगमशास्त्रस्यानित्यत्वात् अपरिलोपस्य चानित्यतामात्रं पुराणेति निर्देशेन ज्ञाप्यते इति तु तत्त्वं। तदेवं बाधकस्येव निपातना
द्विबाधकान्येयानपानानानिर्हीदृषोदरादिपाठे सिद्धे स्यात्।

केषांचिन्मते ...

नीति भाष्ये स्थितं। पूर्वाभ्नेदं संज्ञासूत्रं किंतु गणसूत्रं शुद्धिमात्रफलकं। यानि सर्वनामानि तान्येव सर्वादीनि न त्वितराण्यपीति व्याख्या
नात्। पश्यति ह गोत्रादीनि कुत्सनाभीक्ष्ण्ययोरिति सूत्रे कुत्सनाभीक्ष्ण्ययोरिति योगविभागे गोत्रादीनि इत्यनुवर्त्य एतयोरर्थ
योः पाशि वर्त्तितान्येव गोत्रादीनीति गणशुद्धिपरतया व्याख्यास्यते। तेन च न चिद्वि गोत्रादि तद्धिताम्रेडितेषु गतेः। कुत्सने
च सुप्यगोत्रादाविति सूत्रयोरपि विशिष्टानामेव गोत्रादीनां ग्रहणं तथेहापि। ननु एवं रीत्या त्यदादीनामङ्गत्वाद्यंतर्गणकार्यं सिध्यतु।
सर्वनाम्नः स्मैइत्यादिकं तु कृत्स्नसकलादिष्वपि स्यादिति चेन्न। गणपाठसामर्थ्यात्तत्रपठितानामेव ग्रहणात्। एतावा
नेव हि भेदो यत्सर्वोलोपः पक्षे संज्ञाविधेया गणशुद्धिस्तु आर्थिकी। अस्मिन्स्तु पक्षे गणशुद्धिः शाब्दी। कृत्स्नादिव्यावृत्तिरपी
ति। अथवा उभयमनेन क्रियते। पाठशुद्धिः संज्ञा च तं त्रावृत्त्येकशेषाणामन्यतमाश्रयणात्। तत्र सहविवक्षां विना पृथ
चनिक एकशेषः। आवृत्तिपक्षे हि प्रसाध्यातं सरूपसूत्रे इकोगुणवृद्धी इत्यादिकं शास्त्रप्रक्रियार्थं सत्सहविवक्षां विनाप्ये
कशेषं विधत्ते। तद्वितीयपक्षाचाप्रियपक्षाः स्थिताः। संज्ञाभूतानां व्यावृत्तिस्तु गौणमुख्यन्यायेनापि सिध्यति। न चासोपदकार्ये
ष्वेवेति वाच्यं। विशिष्टरूपोपादाने सर्वत्रितत्यप्रवृत्तेरित्युपपादितमोत्तत्रे ... कीत्यातु एकसंज्ञाधिकारे सर्वनामसंज्ञानं राम०
तरमेकद्रव्यनिवेशिनी संज्ञेति संज्ञासंतया सर्वनामसंज्ञा बाध्यते इत्यपि समाधानांतरं बोध्यं। यद्वा पूर्वपरावरेति गणसूत्र

अपरा... ५

त्रे असंज्ञायामिति योगं विभज्य सर्वोत्तरयोः शेषोपाख्येपः। उक्ताः सर्वादयः वक्ष्यमाणाः स्वादयश्चासंज्ञायामिति तस्मादुप
सर्जनस्याव्यतिरेकान्वर्थसंज्ञाश्रयणस्य मुख्यं फलं। ननु अनुपसर्जनादिति प्रकरणांतरेण व्याख्यायतां इत्येनैव अंतर्गणकार्यं वा
अनुपसर्जनी... रितं भाष्ये तथा। अनुपसर्जनीति लुप्तषष्ठीकं पदं। अ अ आदिति छेदः। अश्च अत् च तयोः समाहारः अत्। अकारांतस्य अ अ
तू आदेशौ यत्र क्षिप्येते तत्र अनुपसर्जनस्य ग्रहणमिति परिभाषार्थः। तेन त्यदाद्यत्वं अद्ड् डतरादिभ्य इत्यद्ड्भावश्च गौणतायां
न भवति। अकारांतत्वं विशेषणं किं। पंचम्यां अत्। युष्मान् अतिक्रांतेभ्यो अतियुष्मत्। एकवचनस्य च। युष्मान् अतिक्रांतादति
युष्मत्। न ह्ययमकारांतरो विधीयते इति तथा चोपसर्जनत्वात्तेरव्यव्यासिद्धौ किं महासंज्ञयेति चेन्न। अतिसर्वायेत्यादि
वारणस्य तदेकसाध्यत्वात्। न हीदं अनुपसर्जनादित्यनेन साधयितुं शक्यते। एतदपरितोषादेव हि भाष्ये महासंज्ञाश्रयण
मिति दिक्। एवं चानुपसर्जनादिति सूत्रं परिभाषा च विनापि नोपयुज्यते इत्यर्थात्प्रत्याख्यातमेव भवतीत्यवधेयं। स्यादेतत्। कौं
भकारेयसिद्ध्ये सूत्रमारंभणीयं। तत्र हि कुंभकारीशब्दादेव ढगुत्पादयितव्यः। अन्यथा कुंभेलुकारस्य वृद्धिर्न स्यात्। तथा च वि
शिष्टस्य स्त्रीप्रत्ययांतता प्येष्टव्या। सा च तत्तदेव निर्वहति। परिदृष्टिग्रहणमिति सूत्रे प्रत्ययग्रहणपरिभाषया त्र्यणि स नेनारणांत
ग्रहणेन च प्रातिपदिकविशेषणदर्शनात् प्रकृतिः स्यात्। तच्च समासप्रत्ययविधौ प्रतिषेध इति ग्रहणवता प्रातिपदिके

अतिलकारान्तादरूपस्य सर्वनाम्नि विशेषणकार्ये सत्ता... सर्वनामकार्यमात्र...

श॰कौ॰ नतदंतविधिर्नेति निषेधाद्दुर्लभं। अनुपसर्जनादिति उपसर्जननिषेधसामर्थ्यात् प्रधानेन तदंतविधौ ज्ञापिते कौंभकारेयः
सिध्यतीति स्पष्टमेव। न च कृद्ग्रहणे गतिकारकपूर्वस्यापीति परिभाषया कुंभकारशब्दादेव स्त्रीप्रत्ययोस्त्विति वाच्यं। अणिति
हि तद्धितोपि गृह्यते। ओ ऽपवादीति यथा। कृद्ग्रहण इति परिभाषा तु कृन्मात्रग्रहणे प्रवर्त्तते। न तु कृदकृद्ग्रहणेपि। एवमर्थ
मेवेदं सूत्रमिति भाष्यकृतैव चतुर्थे स्थापयिष्यते। तत्कथमिह क्रमतुपसर्जनादित्ययं योगः प्रत्याख्यायते इति अत्रो
च्यते। चतुर्थे सूत्रकाराभिप्रायवर्णनमात्रं करिष्यते। निष्कर्षे तु क्रियमाणे सूत्रं वैयर्थ्यमेवायाति। तदाशयेनेह भगवतोक्तं
प्रत्याख्यायते इति। तथा हि। कारशब्दात् ङीबुत्सर्गादपि कौंभकारेयः सिध्यत्येव। ष्यङः संप्रसारणमित्यत्र भाष्यकृता
पठिष्यमाणया वाचनिक्या स्त्रीप्रत्यये चानुपसर्जनेनेति परिभाषया अनुपसर्जनेस्त्रीप्रत्यये तदादिनियमनिषेधेन कुंभ
कारीशब्दाड्ढगुत्पत्तेः। अत एव हि परमकारीषगंधीपुत्र इत्यत्र ष्यङः तस्योच्यमाने संप्रसारणं परमकारीषगंध्याशब्दस्यापि
भवत्येव। नैवं वमतिकारीषगंध्यपुत्र इत्यादावतिप्रसंगः। अनुपसर्जन इत्युक्तत्वेन उपसर्जने तदादिनियमसत्वात्। न चैव
महापिप्पलीत्यादौ हल्ङ्याब्भ्यो दिर्लोपो न स्यादिति वाच्यं। हल्ङ्याबिति सूत्रे दीर्घग्रहणसामर्थ्येन तत्रोपसर्जनेनापि तदादिनि राम०
यमो नास्तीति ज्ञापितत्वात्। वस्तुतस्तु निष्कौशांब्यादेः समुदायस्याब्ङ्यंतत्वेपि अवयवस्याब्ङ्यंतत्वे यातत्तः परस्य

[illegible] [redacted] [illegible]
[illegible]
[illegible]

सोर्लोपप्राप्तेर्नेति ज्ञापकं। अर्द्धपिप्पल्यादावप्यवयवस्याङ्यंतत्वेनैव निर्वाहः। न च विहितविशेषणत्वात् कुंशब्दात् ङ्यापोस्त्या
दावव्याप्तेः। न च तत्र हलंतादिहितत्वेन निर्वाहः। कर्त्री हर्तेत्यादावलोपापत्तेः। यं सङ्न्तादेर्लोपापत्तेश्चाप्यहा। सुतिसीति
प्रत्यये प्रकृतिरक्षिप्यते। हलंत्यसूत्रे कैयटग्रंथनिर्वाहाय विवरणे तथैव वर्णनात्। एवं च ज्ञापकं सुस्थं। एकदेशस्याप्र
कृतित्वात्। अत एव पंचमस्येत्यादौ प्रयोगे स्त्रियोरुपसर्जनस्येति सूत्रे कैयटेन ज्ञापकत्वपक्ष एवोक्तः। न च भयगाद्यापिमालादि उपसर्जनेन तदादिनियमो भवते भावः
ष्वेत्सारोपे समुदायाद्राबंतत्वप्रयुक्तः सुस्यात्तत्तत्स्वैकपदैकस्वर्यपोरापत्तिः। एकवाक्यतया विक्षिरिति पक्षेपि पचतिक
ल्पमित्यादिसिद्धये एकवचनमुत्सर्ग इत्यस्यावश्याश्रयणीयत्वादिति चेन्न। ङ्याब्ग्रहणस्यानन्यार्थतायाय्यथा कथंचित्प्राति
पदिकग्रहणे लिंगविशिष्टस्य ग्रहणेन ङ्याबंतात्सुबुत्पत्तेश्च वक्ष्यमाणत्वात्। इह च समुदायस्यापि प्रातिपदिकत्वात्तदर्थ
वत्समुदायानां संख्यासंग्रहणं नियमार्थमिति दिक्। स्यादेतत्। न चैवमपि कदाचित्कारीशब्दात् ढक् स्यादेवेति वाच्यं। एकाज्द्वि
वचनन्यायेन समुदायादेवोत्पत्तेः। कुंभेन कार्थीभूतस्य निष्कृष्य अपसेन योग इति वक्तुमशक्यत्वाच्च। किंच सूत्रमारभ
माणस्यापि ष्वेवगतिः। ओपगवीत्यादावविवेकबलात्कारशब्दादपि कदाचित् ङीप्प्रसंगेन कौंभकारेयपाक्षिकदोषस्य त्वस्यापि
तुल्यत्वात्। स्यादेतत्। अक्रियमाणे अस्मिन्सूत्रे कुंभकारीत्यत्र ङीबेव न स्यात्। कुंभेन कार्थीभूतस्याणंतस्य स्त्रीत्वेनायोगात् प
[illegible]
[illegible]
[illegible]

स्त्रीसंप्रत्ययार्थद्रुत्विशेष्यद्राः पक्षः १ एवं स्त्रीत्वविशिष्टस्वार्थे वाच्येनैकार्थवृत्तस्त्रीत्वेनपायुक्ते तिप्रत्ययेतलिङ्गं ४

शब्द॰कौ॰ सर्वस्त्रीत्वेन योगे विशिष्टस्यैव तदन्तं। तस्मादमहत्पूर्वादिति निषेधेन ज्ञाप्यमानस्तदन्तविधिरत्र स्त्राप्यभ्युपगन्तव्यः। स च य
था पूर्वत्रोपसर्जनेनापि भवति। निषद्वरस्त्रादिभ्यः। प्रियपञ्चाशीपदी। ब्रह्मोश्चा। अनिधीवरीति। तथा ऽतिदारावपि स्यात्। ततश्च बहु
कुरुचरेत्यादावतिप्रसङ्गः। अतो निषेधसूत्रमिदं सार्थकं। ननु सर्वत्रोपान्त्यं तदन्तं च स्त्रियामित्यनेन विशेष्यते टिड्ढाणञित्यादौ
तु उपात्तैः टिदादिकमेव। तेन बहुकुरुचरेत्यादौ टिदादेः स्त्रीत्वान्न ङीप्। कुम्भकारीत्यादौ तु स्त्रियां वृत्ते स्तदन्तादपि ङी
प्रभविष्यतीति चेन्न। एतद्विषयविभागस्य दुरूहतया तज्ज्ञापनार्थमेव सूत्रारम्भस्योचितत्वादिति। नैतदेवं। आरब्धेऽप्यस्मि
न्सूत्रे व्याख्यानस्यैव शरणीकरणीयत्वात्। अन्यथापञ्चाजीत्यत्र अजा नाम स्त्रीत्वे पि तदन्तस्य स्त्रियां वृत्त्यभावात् प्रसङ्गात्।
अतो विशेषणविशेष्यभावं प्रतिकामचारात् टाबाद्यन्तदाबित्यत्र टिड्ढाणञित्यादौ चोपात्तं स्त्रीत्वेन विशेष्यते। बहुकुरुचरेत्यादौ
तदन्तं तदन्तं चेति सकलेष्टसिद्धेः सूत्रं व्यर्थमेव। स्यादेतत्। तदन्तविधिज्ञापनार्थमेवेदं सूत्रमारम्भणीयं। न चामहत्पूर्वेत्स
नैनैव तत्सिद्धिरिति वाच्यं। तस्य ज्ञापकत्वायोगात्। पञ्चाजीत्यादिसिद्ध्यर्थमजादिभिः स्त्रीत्वं विशेष्यते इति हि वक्ष्यते। तथा
च महत्पूर्वः शूद्रीत्यत्र समुदायस्य स्त्रियां वृत्तावपि अवयवस्य तथात्वेन सत्यपि तदन्तविधौ टाब्प्राप्तो नीति कथं तदन्तविधिज्ञा राम॰
पपित्वान्निषेधः पर्यवस्येत्। मैवं। एतैरजादिभिः स्त्रीत्वविशेषणेऽपि शूद्राशब्दे नाविशेषणात्। एवं च स्पष्टमेव ज्ञापकं पर्यव

महाशूद्रस्याप्यस्य पुंवत्त्वादितिभावः २

अनुपसर्जनमिति निषेधसूत्रेऽतिरिक्तः ४

सानं न चैवं पञ्चशूद्रीत्यत्रातिप्रसङ्गः। जातिरित्यनेन शूद्रस्य विशेषणात्। स्यादेतत्। एवं सूत्रनिर्देशे वापिशलमधीते
इतीतिकाल्पायनोक्तरीत्या सूत्रं सार्थकं। तथाहि अप्रधानमुपसर्जनं। तथैव पूर्वाचार्यसूत्रे बहुलोके च व्यवहारात्। ततश्चा
पिशलिना प्रोक्तं। इञश्चेत्यण्। ततोऽध्येत्रन्तद्धीते इत्यण्। तस्य प्रोक्ताल्लुगिति लुक्। आपिशला ब्राह्मणी। अत्र प्रोक्ता
र्थस्याणोः प्रधानत्वात्तदन्तान्न ङीप्। अणो ह्यप्रधानमिति विशेषणात्। न चैवमप्यध्येत्रा मुखेन त्रस्याणोऽनुपसर्जनत
यात्तदाश्रयो ङीप् स्यादेवेति वाच्यं। तस्य लुप्तत्वात्। न च प्रत्ययलक्षणं शङ्क्यं। वर्णाश्रयेण निषेधात्। टिड्ढाणञित्यत्र ह्यत
इत्यनुवर्तते। अणा च अकारो विशेष्यते। अणो अकार इति न तु विपरीतो विशेषणविशेष्यभावः। वर्णस्याप्राधान्ये प्र
त्ययलक्षणापत्तेः। अत एव ङित्यत्र तदाह इत्यवत्। ननु स्त्रियामित्यनेनाणो विशेषणान्नोक्तदोष इति चेन्न। काशकृत्स्नि
ना प्रोक्ता मीमांसा काशकृत्स्नी। तामधीते काशकृत्स्ना ब्राह्मणी। अत्र द्वितीयेऽणि प्रोक्ताल्लुगिति लुक्सम्प्रयमोऽप्यण
स्त्रियामेवोत्पन्न इति तदन्ता द्विस्त्रायां वर्तमानात् ङीप्प्रसङ्गात्। तस्मात्प्रधानाद्यथा स्यादप्रधानान्मा भूदित्येतदर्थमा
रम्भणीयं सूत्रमिति। अत्रोच्यते। अध्येत्रामभिधेयायामणीकारेण भवितव्यं। पश्चिहाध्येत्राभरणसन्नः सलुप्तस्थाप
श्च अप्यतेतस्मादकारउसन्नोऽनुप्तस्थेति पुनर्न भवति। सकृत्प्रवृत्तौ लक्षणस्य चरितार्थत्वात्। तस्मादनुपसर्जनादित्ययं

लुक्तद्धितलुकीति

श॰ह॰कौ॰ यं योगः प्रत्याख्यायते इति भगवद्वाक्ये निर्बाधैवेति दिक्। सर्वादयश्च पंचत्रिंशत्। सर्व। विश्व। उभ। उभय। डतर। डतम। अन्य।
अन्यतर। इतर। त्वत्। त्व। नेम। सम। सिम। पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायां। स्वमज्ञातिधनाख्यायां। अं-
तरं बहिर्योगोपसंव्यानयोः। त्यद्। तद्। यद्। एतद्। इदम्। अदस्। एक। द्वि। युष्मद्। अस्मद्। भवतु। किम्। इति। तत्र सर्वविश्व-
शब्दौ कृत्स्नपर्यायौ। सर्वशब्दस्य स्वांगशिटामित्याद्युदात्तत्वे प्राप्ते तोदात्तत्वं गणे निपात्यते। तेन सर्वेषां विकार इत्यत्रानुदा-
त्तादेश्चेत्यनुदात्तादिप्रकृतिकाद्विधीयत इति ड्या प्रत्रे भाष्ये स्थितं। प्रयोगे तु सर्वस्य सुपी त्याद्युदात्त एव। उभ-
शब्दो द्वित्वविशिष्टस्य वाचकः। अत एव नित्यं द्विवचनांतः। यद्येवं तर्हि किमर्थमसौ सर्वादिषु पठ्यते। न ह्यत्र स्यायादयः सं- पद
भवंति। अकच् तु नास्ति रूपे स्वरे वा विशेषः। अवग्रहस्तु कप्रत्ययेऽपि पदकारैर्न क्रियते। चित्र इद्राजा राजका इत्यके र-
ण दीर्घत्वेव निर्णीतत्वात्। न च उभाभ्यां हेतुभ्यामुभयोर्हेत्वोरित्यत्र सर्वनाम्नस्तृतीया चेति पाक्षिकतृतीयासिद्ध्यर्थमि-
ह पाठ इति वाच्यं। निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमिति वार्त्तिकेन गतार्थत्वात्। न च वृत्तिकृता सर्वनाम्नस्तृती-
या चेति सूत्रे पठितत्वात् इदं वार्त्तिकमपि सर्वनामसंज्ञासापेक्षमेवेति वाच्यं भाष्ये हेतौ वितिसूत्रे तस्य पठितत्वात्। अत एव राम॰
त्तेन कारणेनेत्यत्र सर्वनामकार्यासिद्धो दाहृतं हरदत्तेन। उच्यते। उभशब्दस्तावद्द्विवचनमात्रविषयः। हन्तो तु द्विवचनलोपान्ना

योग॰ [illegible]
[illegible]

सौ प्रयुज्यते। उभाभ्यां पक्षाभ्यां विनीतनिद्र इति विग्रहे उभयपक्षेत्यादिप्रयोगदर्शनात्। कथं तर्हि उभस्थाने उभयशब्दसिद्धि-
रिति चेदित्थं। उभादुदात्तो नित्यमित्यत्र उभादिति योगो विभज्यते। अवयवात्तेः संख्यावाचिन उभशब्दादवयविन्यर्थे अय-
च् स्यात्। उभयो मणिः। ततो नित्यं। उभशब्दाद् वृत्तिविषये नित्यमयच् स्यात्। अनिर्दिष्टार्थत्वात् स्वार्थे। तदेतद्दर्शान्तिककृता।
उभयोऽन्यत्रेति। एवं स्थिते उभयतः उभयत्रेत्यादावकच्प्रत्यये तु उभय एव भाष्यः। अकचि तु उभकावित्यादि सिध्यति न चोभप्यु-
भय इति स्यादेवेति वाच्यं। अकजर्थे सर्वादिषु पाठेनायचो बाधात्। अन्यथा पाठवैयर्थ्यापत्तेरिति दिक्। स्वांगशिटामदंतानां-
मित्याद्युदात्तार्थोऽपि पाठ इति तु न युक्तं। गणे एवांतोदात्तस्य निपात्यमानत्वात्। अन्यथा उभे भद्रे जोषयेते। उभाउ नूनं। उभाभ्यां
देवसवितः। सप्तत्यत उभयोर्न मामपोरित्यादौ आद्युदात्तप्रसंगात्। उभयशब्दस्त्ववयवद्वयारब्धे अवयविनि वर्तते। उ-
भयो मणिरिति यथा। उभयमलोहिताभ्यामवयवाभ्यां मारब्ध इत्यर्थः। तिरोहितावयवभेदत्वादेकवचनं। उभयमेव वदंति मनी-
षिणः इत्यादौ तु समुदायेऽपि दृश्यते। समुदायोऽर्थः। तिरोहितावयवभेदत्वं तु तुल्यमेव। यदा तु वर्गद्वयारब्धे महासमु-
दाये वर्तते तदा वर्गाभिन्नेन वर्गद्वयेन महाभेदविवक्षया उद्भूतावयवभेदत्वाद्बहुवचनांत एव। उभये देवमनुष्याः। तस्य
मित्राण्यमित्रास्ते ये च ये चोभयेन्द्रयाः इति यथा। यदा तु प्राणनेरीत्या उभयो मणिरिति युक्तायता दृष्टमेव मणिद्वयं सह वि-

[illegible] उभयो मणिः [illegible]

[illegible]

श.कौ.का. तस्यनेतदाप्स्कन्दोषेणाद्विवचनंप्राप्नोति। अनभिधानात्तुन भवति। तथाचलद्धितश्चासर्वविभक्तिरितिसूत्रेऽत्रत्नद्धितानांग्रहणंचया
डेइतिभाष्यमवतारयन्केयटआह। उभयशब्दस्य द्विवचनानुत्पादात् सर्वविभक्तित्वमिति। हरदत्तस्तुतस्मिन्नेवसूत्रे उभयशब्दाद्वि
वचनमंगीकृत्यतदाश्रयणंतुपचतिकल्पंपचतिरूपमित्यादावतिप्रसंगंवारयितुंमित्याह। उक्तअयजादेशःसस्यानिद्रावेन
तयप्रत्ययांततयाप्रथमचरमेतिसूत्रेणजसिविभाषाप्राप्नोति। व्यवस्थितविभाषयापूर्वविप्रतिषेधेनवानित्यमेवजसिसर्वनाम
तेतिकेचित्। विभक्तिनिरपेक्षत्वेनांतरंगत्वान्नित्यसंज्ञयाबहिरंगवैकल्पिकीबाध्यते इतितुसिद्धांतः। नवेतिविभाषेतिसूत्रेभा
ष्यकारस्त्वाह। अयचप्रत्ययांतरमेवानतुतयोदेशः। उभादुदात्तइतिसूत्रेतयपोनत्तुवृत्तेः। अयचएववचनानुवृत्तेः। न
चैवमुभयीइत्यत्रटिड्ढाणञितिसूत्रेणतयबंतलक्षणोङीप्स्यादितिवाच्यं। तत्रमात्रजितिमात्रशब्दात्प्रभृतिअयचश्चक
रेणप्रत्याहारग्रहणात्। एवंचतयप्ग्रहणमपितत्रनकार्यं। यद्वा। द्वयसजितिप्रत्याहारः। तथाचद्वयसञ्मात्रचोरपिग्रहणंनकर्त्त
व्यमितिमहदेवलाघवं। वस्तुतस्तुप्रमाणेमात्रचद्वयसच्दघ्नच्इतिणव्यमितिभाष्याशयः। तथाचततोपिलाघवं। नचैवंक
तिस्त्रियइत्यत्रातिप्रसंगः। अतइत्यनुवृत्तेः। नषट्स्वस्रादिभ्यइतिनिषेधाद्वा। नचैवंतैलमात्रेत्यादावतिप्रसंगः। सदृशःस्याप्य राम॰
स्यप्रत्याहारेऽप्रसंनिविष्टत्वादितिः। अत्रकश्चित्। उभयेसर्वपरोनिर्देशः। तेनव्यथांद्वयेषामपिमेदिनीभृत्तामितिमाघप्रयोगः

[illegible]

समर्थितोभवतीत्याह। तत्र। अर्थपरतायांवृत्तिकारादिभिरुक्तवचनानुपलंभात्। महाकविप्रयोगबलादेवेदंकल्प्यतेइतिचे
न्नमहाकविभिरेवतद्विपरीतस्यबहुशःप्रयोगात्। तथाचमाघः। गुरुद्वयायगुरुणोरिति। कालिदासोपि। अस्मिन्द्वयेरूपवि
धानयत्नइति। श्रीहर्षश्च। अयेममोदासितमेवजिह्वयाद्वयेपितस्मिन्ननतिप्रयोजनमितिनस्माद्वयं द्वैधंइत्यमंतिरिद्धंतोतिद
येषः। तेषांद्वयेषामितितुयेषः क्विबंतस्वरूपंबोध्यं। यत्तुकश्चिदाह। चान्द्रवर्मणव्याकरणेद्वयशब्दस्यापिसर्वनामताभ्युपगमा
त्तदीत्यायंप्रयोगइतितरपिना। मुनित्रयमतेनैवेदानीं साध्वसाधुविभागः। तस्येवेदानींतनशिष्टैर्वेदांगतयापरिगृहीतत्वा
त्। द्वयंपंतेहिनिपतत्कालाः स्मरतयः। यथाकलौपाराशरस्मृतिरित्यादीतिज्ञाता चउभ्यतावशातेइतिसूत्रेसर्वैकवाक्यतया
चिदा[illegible] सिद्धांतितत्वात्। डतरडतमौप्रत्ययौ। यद्यपिसंज्ञाविधौप्रत्ययग्रहणेतदंतग्रहणंनास्तितथापीहप्रयोजनंसर्वनामाव्यय
संज्ञायामितिवाचनिकस्तदंतविधिः। केवलयोः संज्ञायांप्रयोजनाभावाद्वा। अन्योभिन्नः। अन्यतररान्यतमशब्दावव्युत्पन्नौ
स्वभावाद्विबहुविषयेनिर्धारणेवर्त्तेतेइतिपस्पशायांकैयटः। तत्रान्यतमशब्दस्यगणेपाठाभावान्नसर्वनामकार्यं। नाप्यडुत
रादिभ्यइत्यद्यंतर्गणकार्यं। तथाचप्रयुंजते। नतावस्मामन्यादिस्वन्यतमंतमरेति। शाकटायनस्तुअन्यतरान्यतमशब्दावुडत
रडतमांतौव्युत्पादितवान्। तन्मतेप्यन्यतरशब्दपाठस्यनियमार्थत्वादन्यतमशब्दोन्तर्गणकार्यंसर्वनामसंज्ञाकार्यंचनल

[illegible]

द्वैमटोकरीत्याउतमपसप्तानेसंताभवलेवेलिगोप्यंर

शब्द·कौ० मतेइति तद्व्याख्यातारः। उँतरस्त्वन्यनीचयोरित्यमरः। त्वत्इति द्वावप्यदन्तावन्यपर्यायौ। तत्रैकउदात्तः। अपरोनुदात्तः। एतंत्वमन्येद
शायं त्वमुत्वमित्युदात्तस्य प्रयोगः। उतत्वः पश्यन्नित्यादिरनुदात्तस्येति विवेकः। केचित्तु त्वदिति त्वांतमेकं पठंति। तथाच त्वयदेवः
प्रापुत्र। त्वदधरमधुरमधूनि पिबंतमिति। त्वत्तः अन्यस्याः अधर इति षष्ठीतत्पुरुषः। न तु त्वद्बाधात्त्वदधर इति। पश्यति दि
शि दिशि रहसि भवंतमिति पूर्ववाक्येन सहान्वयापत्तेः। अनुदात्तश्चायं। त्वत्त्वसमसिमेत्यनुच्चानीति फिट्सूत्रात्। तथा
च प्रयुज्यते। स्त्रीहत्वद्वतिस्त्रेतउत्वदिति। त्वदिति सर्वनामसुपश्छिलोनुदात्तोपमन्यपर्याय इति तद्व्याख्यारम्भापौ वेदभाष्यका
रौ। इह भाष्युक्तरीत्या उदात्तानुदात्तयोरनुदात्तस्य तकारांतस्य च प्रामाणिकत्वं निर्विवादमेव। गणपाठे परं विप्रतिपत्तिः।
तत्राप्यनुदात्तस्य अकारांतस्य गणपाठेन संशयः। उतो त्वस्मै तन्वमित्यादिप्रयोगात्। अवशिष्टयोर्मध्ये कतरस्य गणे
पाठ इति तु संशयः। उदाहृतप्रयोगाणां तत्रौदासीन्यात्। तस्मात्त्वांतस्य अकजादिकमुदात्तस्य वाम्नायादिकं कश्चिदिच्छा
रतायां प्रयुज्यते न वेति विभाव्य तत्त्वं निर्णयं वदंतु तेरिदिकः। वस्तुतस्तु आद्यस्य तांतच्छेद एव युक्तः। अन्यथा एकशब्दस्वत्व
रसर्वनाम्न्याएकप्यतुसोभयसंग्रहसंभवात्त्वशब्दमेकमेवापठिष्यदिति ध्येयं। त्वे वसूनि। त्वे रायः। इत्यादयस्तु शे प्रत्यये तस्य राम०
पुष्करः प्रयोगाः न तु त्वशब्दस्य। पदकारैः प्रगृह्यत्वप्रयुक्तस्य इति शब्दस्याप्रयोगादिति स्थितं वेदभाष्ये। नेम इत्यर्द्धे। प्र

तथाप्सरसि यंभौत्करपितोजात्रेयस्यकर्तुनरामन्यननगारविप

योगश्च। प्रनेममस्मिन्ददृशे सोम इति। समः सर्वपर्यायः। न भंतामन्यके समे। मानो वृकाय वृक्ये समस्मै। उरुष्यारणो अघा
यतः समस्मात्। उतो समस्मिन्ना। तुल्यपर्यायस्य तु समशब्दस्य न सर्वनामता। यथासंख्यमनुदेशः समानामिति ज्ञाप
कात्। अन्ये जनं तरति सहस्रेण ते दोषाः समा भूयांसो वेति भाष्यकारप्रयोगाच्च। एतेन समे पजे नेति प्रयोगो व्याख्यातः। सि
मः। कृत्स्ने च शक्के च स्यान्मर्यादाबंधयोरिति निघंटुः। आद्यस्त्रीवाचस्त्वन्तु तेसि मस्मै। उच्छ्रुकमत्कमनते सिमस्मात्। य
घ एह त्वेतत्समसिमेत्यनुच्चानीति प्रातंतथ्या। पि सिमस्याघ सर्गेतत उदात्त इत्युदात्तता। अथर्ववेदप्रविष्टमंत्रे ते मे वे
दमृगतपीति अभियुक्तैर्व्याख्यातत्वादित्यवधेयं। पूर्वपराव इत्तरापराः। पंच दिक्कालयोस्तदवच्छिन्ने च। पूर्वस्यां दिशि।
पूर्वस्मिन्काले। पूर्वस्यां वाप्यां। पूर्वस्मिन् ग्रामवित्यादि। दक्षिणाधरशब्दौ दिशि तदवच्छिन्ने च। अर्थनियमश्चायं व्यवस्था
यामित्युक्तेरप्यन्तेस्वाभिधेयेनापेक्ष्यमाणस्यावधेर्नियमो हि व्यवस्था। स्वाभिधेयापेक्षावधिनियमो हि नियमेन कंचिदवधि
मपेक्ष्यते। स्थाणाः पापच्चोभावेरति किंनिमा सेऽन्तरदनिपातनादि। व्यवस्थायां किं। दक्षिणा गाथकाः। प्रवीणा इ
त्यर्थः। अधरेतां बलगाः। उत्तरे प्रत्युत्तरे वा उक्तः। कथं तर्हि तथापरेषां युद्धिवेति कालिदासः। अपरे प्रत्यवतिष्ठन्ते इत्या
दि च। अत्राहुः। देशावाचितया व्यवस्थाविषयपौरेवघषपरशब्दयोरप्यवाराउत्तौ वादिभिः प्रयोगाः। नचैवमुपसर्जनताभ

४१

शा॰ हृ॰ को॰ हिलाक्षणिकत्वमुपसर्जनत्वं किंतु स्वार्थविशिष्टार्थांतरसंक्रमः। स तु न वृत्तिमविष्टस्यापि प्रधानस्य। न वा लाक्षणिकस्यापि
वृत्तिमप्रविष्टस्य। अत एव तस्माद्धिमानित्यादौ ज्ञानलक्षणया क्षेपितदः सर्वनामकार्यं। तद्यो ऽहं सो ऽसौ यो ऽसौ सो ऽहमित्यत्र भा
गत्यागलक्षणायामपि सर्वनामकार्यप्रवृत्तिरिति भ्वादिसूत्रे ऽप्येतान्मपी तिरतत्याति पाघानि वस्तु नीत्यर्थ इति कैयट
श्च। वस्तुतस्तु अत्र शान्तत्वादिप्रकारको बोधो ऽन्नश्वादिशब्देभ्यो भिन्नत्वादिरिगार्थिकः। शब्दास्तु देशांतरनिष्ठत्वादिप्रका
रक एवेति तत्त्वं प्रसिद्धत्वानुनावधेः प्रयोगः। मेघो वर्षतीत्यत्र जलस्य यथा। एवं दिशः सपत्नी भव दक्षिणस्या उत्तरादावपि
वस्तुतो व्यवस्थास्तीति सर्वनामकार्यं भवत्येव। न च संज्ञात्वान्निषेधः। आधुनिकसंकेतो हि संज्ञा। न च दिक्षु सास्तीति
पंचमेऽस्मत्स्थातिप्रकरणे कैयटहरदत्तादयः। अत्र दिक्षु चिरंतनः कुरुषु त्वाधुनिकसंकेत इत्यत्र व्याख्यातृवचनमेव प्र
माणं। असंज्ञायां किं। उत्तराः कुरवः। सुमेरुमवधिं मन्येत्यत्र कुरुष्वुत्तरशब्दो वर्तते इत्यस्ति ह्यवस्था। स्व॰ तदा स्वस्य चत्वारो
र्थाः। आत्मा आत्मीयो ज्ञातिर्धनं चेति। स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वो ऽस्त्रियां धने इत्यमरः। यद्यपि स्वामिन्नैश्वर्य इ
ति सूत्रे ईश्वरत्वरूपः स्वशब्दः स्वीकृतस्तथाप्यसो मत्वर्थीयामिं च प्रत्ययमात्रविषयो न तु केवलः प्रयोगार्हः। तत्र ज्ञाति राम॰
धनयोर्निषेधादात्मात्मीययोरेव संज्ञा। आख्याग्रहणं किं। आत्मीयत्वं पुरस्कृत्य ज्ञातिधनयोरपि प्रवृत्तौ सर्वनामता यथा।

नि२

[illegible]

स्यात्। आत्मात्मीययोरित्येव तु वक्तुमिहोचितं। स्वस्मै इत्यादि। जसि विभाषा विधायके ऽष्टाध्यायीस्थसूत्रेऽप्येवं। यत्तु त
त्र स्वमात्मीये इत्येव वक्तुमुचितं। आत्मवाचिनो नपुंसकतया जसि विभाषायामुपयोगाभावादिति केचित्तच्चिंत्यं। सूत्रसा
मर्थ्यादेवात्मन्यपि पुंस्त्वलाभात्। अत एवामरकोशेऽपि आत्मनीति पूर्वान्वयि। स्वमिति तूत्तरान्वयि। तथा च हेमचंद्रः।
योः स्वर्गनिभयोः स्वो ज्ञात्यात्मनोः स्वं निजे धन इति। मेदिनीकारोऽपि। स्वः स्यात्पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीये स्त्रियां धन
गणपाठे विशेषः ५ इति। वस्तुतस्तु पूर्वपरेत्यादि त्रिसूत्र्यामर्थनिर्देशाः पाठविशेषणं। तेन इतरेषां पाठादेव पर्युदासः। तथा च विभाषा ज
सीति प्रकरणे पूर्वादीनि नवैव लाघवात्कर्तव्यं। त्रिसूत्रीं तु न पठनीयेवेति निष्कर्षः। अथ वा गणपाठ एव पूर्वादि [illegible]
प्रथम [illegible] नवकपाठानंतरं विभाषा जसीति कर्तव्यं। पूर्वादीनि च अर्थविशिष्टान्यनुवर्तनीयानि। न च सर्वादिनामप्यनुवृत्तिः
शंक्या। नेमस्य जसि विभाषारंभात्। यद्वा। जस् ङसि ङि ना ङि स्मात्स्मिनः पूर्वादिभ्यो नवभ्यो वा। औङः आपः शी। न
पुंसकाच्चेति सूत्रमेस्याः कर्तव्यः। परमार्थस्तु सूत्रमेव यथान्यासमेवास्तु। पूर्वादिभ्यो नवभ्यो वेत्येतत्तु जसः शी इत्य
त्रानुवर्त्य वाक्यभेदेन संभंत्स्यते वा छंदसीत्येतदपि पूर्व इत्यत्र यथा। तथा च पंचित्सूत्री अष्टाध्याय्यां न पाठ्येति स्थितं।
असंज्ञायामिति तु न कार्यं। अन्वर्थसंज्ञया अपि व्यपदेशार्थापेइ तिन्यायेन वा संज्ञाया व्युदस्तत्वात्। अंतरशब्दस्तु न

[illegible]

बहेनप्राकारादिः। मुख्यस्तत्स्थः २

शब्द॰ कौ॰ नार्थः। तथा चामरः। अंतरमवकाशावधिपरिधानांतर्द्धिभेदतादर्थ्ये॥ छिद्रात्मीयविनाबहिरवसरमध्येंऽतरात्मनि चेति तत्र बहिर्योगो
पसंव्यानयोरेवार्थयोः संज्ञा। बहिरित्यनावृतोऽरण्यो बाह्यंचोच्यते। तत्राद्येऽन्तरे अंतरा वा गृहाः। नगरबाह्याश्चंडालादिगृहा इत्य
र्थः। द्वितीयेनगराभ्यंतरगृहा इत्यर्थः। उपसंव्यानशब्दोपिकरणव्युत्पत्त्या उत्तरीयपरः। कर्मव्युत्पत्त्या त्वंतरीयपरः। उभयथापि बहि
र्योगेणगतार्थत्वादुपसंव्यानग्रहणं न कर्तव्यमिति भाष्ये स्थितं केचित्तु शाटकानां त्रयेण शरीरसंयुक्तस्य तृतीयस्य। चतुष्टये तु
चतुर्थस्य तत्संयुक्तस्य च तृतीयस्य बहिर्योगाभावादुपसंव्यानग्रहणं कर्तव्यं। शाटकयुग्माद्यर्थमिति वदतो वार्त्तिककारस्या
यमेवाशयः। आदिशब्दबलात्त्वगम्यते। भाष्यमते तु बहिर्योगग्रहणं त्वर्थनं। तेन शीतो स्माभ्यां कारिणीत्यादौ विवेगो
णग्रहणात्परं परयाबाह्यसंबद्धस्यापि भविष्यतीत्याहुः। सत्यपि बहिर्योगे पुरीविषयतायां न सर्वनामता। अपुरीति च वक्त
व्यमिति वार्त्तिकात्। तद्विशेषणस्त्रस्य शेषेण तु जसि विभाषाविधायकस्य। अत इत्यधिकृत्य जसः शी विधानाद्दावंतत्वा
स्याभावात्। अंतरायां पुरि। प्राकारादिबाह्यायां तदंतर्वर्तिन्यां वेत्यर्थः। लिंगविशिष्टपरिभाषयाएकादेशस्य पूर्वांतग्रहणेन
ग्रहणाद्वा प्राप्तिर्बोध्या। त्यद्। तद्। एतौ पूर्वोक्तपरामर्शकौ। तत्राद्यस्याद्दं सः। एष स्य भानुरिति गणरत्नाकरः। तन्न तथा राम॰
प्रतिस्यशब्दं दृष्टिबद्धुलमिति सूत्रे छंदोग्रहणं वैयर्थ्यापत्तेः। यद्। उद्देश्यसमर्पकः। एतदिदमौ प्रत्यक्षोपस्थितौ। अदस्

बहिते। एकोन्यार्थे प्रधाने च प्रथमे केवले तथा। साधारणे समानेऽल्पे संख्यायां च प्रयुज्यते। द्विशब्दो द्वित्वविशिष्टे। अलिंगः संबोध
नैकविषयश्च युष्मदर्थः। अस्मच्छब्दस्तूच्चारयित्रर्थः। सलिंगः संबोधनव्यभिचारी च भवत्वर्थः। भातेर्डवतुरिति व्युत्पादितोयं। प
अनकारांतत्वात् २ घाचस्मात्तदीयास्योनसंभवंति। सर्वनाम्नस्तृतीया चेति तु निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमित्यनेनैव गतार्थत्वात्तथा
पि फिञ्ज् द्विमयटः पूर्वनिपातश्चकच्छसौ तथा। आत्वशेषव्यंजनविरहात्मकश्च भवतः फलं। फिञ्। भावतायनिः। त्यदादित्वे
न वृद्धत्वाद्दुर्दीर्घां वृद्धाद्गोत्रादिति फिञ्। भवंतमंचति भवद्ध्यङ्। विष्वग्देवयोश्चेति च कारेण सर्वनाम्नोनुकर्षणाद्द्यादेशः।
भवन्मयः। नित्यं वृद्धशरादिभ्य इति मयट्। भवन्मित्रः। सर्वनाम संख्ययोरिति प्राङ्निपातः। भावत्कः। भवदीयः। भवतष्ठक
छसाविति त्यदादि शब्दांत नित्यत्वे ये वृद्धादित्येनुवर्त्यते। भवादृक्। आसर्वनाम्न इत्यात्वं। देवदत्तश्च भवांश्च भवंतौ। त्यदादीनि स
र्वैर्नित्यमेकशेषः। भवतो भावो भवत्त्वं। तत्र सर्वनामसंज्ञया गुणवचनसंज्ञाबाधात्ष्यञ्विरहोपि फलं। अन्यथा हि भावत्यमिति स्या
त्। भवकान् सर्वनाम्नो वृत्तिमात्रे इति पुंवद्भावोपि फलं। भवत्याः पुत्रो भवत्पुत्रः। किंशब्दः प्रश्ने आक्षेपे चेति दिक्। वृत्तास
र्वादिगणो वृत्तः। समाप्त इत्यर्थः। यदि द्वाग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्याम् उत्तमस्याम् इत्यत्र तु अवमम् अध्यम् अपरमश
ब्देषु छंदसि सकलविधिव्यत्ययात्स्यागमः। न त्वेतदनुरोधेन सर्वादिराकृतिगणत्वमिति मंतव्यं। अत एव छंदस्यपि सर्व

तेषां तेषां इति त्रियेत्रक तेनेतेइतिस्यात् ५ आसन्नासन्नाभेदर्थस्यत्वप्रः सुकल्पः ६ अपंचप्रकारेण समवृत्तिभावमात्रसुन्निवृत्तये ७ बहुत्वादिनेनिवृत्तत्वात् ८

श॰कौ॰ नामकार्यमेषां न नियतं । येमध्यमाः पितरः । विष्णोः पदे परमे इत्यादौ तदभावात् । ऊहावुभौ ते । इतरेतरस्मात् अन्योन्येषां पुष्करैरामक्रां
तरस्मादि तु द्विः प्रयोगो द्विर्वचनमिति पक्षे तदंतविधिना सिद्धौ स्यान्ने द्विर्वचनपक्षे तु स्यान्निद्भावेनेत्यवधेयं । ननु वस्न सा द्वानि वप्रकृति
प्रत्ययविभागस्य संमोहात्स्यान्निवद्भावेनापि यदल्पमात्रं स्यान्न तु सर्वनामता सुश्लिष्टे स्यान्निनित्तहरिहारिति चेन्न । सन्नियोग
शिष्टत्वेनांतरंगमपि द्वित्वं बाधित्वा समासवच्च बहुलमिति समासवद्भावप्रयुक्तस्य लुकः प्रथमं प्रवृत्तेः । अंतरंगानपि विधी
न्बहिरंगोपि लुग्बाधते इति वक्ष्यमाणत्वात् । ततः प्रत्ययलक्षणेन पदत्वमाश्रित्य द्वित्वप्रवृत्तेः । एतेनैतत्तनामसमभूतभीत
यइत्यादिव्याख्यातं । नन्वस्तु करीत्यादौ इतरेतरस्मादित्यस्य सिद्धिः । अन्योन्येषामिति तु कथं । नह्यत्र समासवद्भावोस्तीति चे
यप त् । तत्र प्रथमैकवचनांतत्वं पूर्वपदस्य द्वितीयादेस्तु यश्यदइति वचनबलेनैव प्रकृतिप्रत्ययविभागस्य सिद्धेरिति दिक् । अन्येतराज्ञा
नपदोयहाभिरिति तु वन्याइत्तरेयेभ्य इति बहुव्रीहिणा समाधेयं । तपर इति ज्ञापकात्सर्वनाम्नः एर्वनिपातोऽनित्यः । पुत्रा
दैकान्यराजय इति तु प्राधान्यादिना आख्यातादित्यर्थे आख्यानणिजंतात् इ जंर्थे कि प्रत्यये लाक्षणिकस्य सर्वनामता वि
रहात्समाधेयं   विभाषादिक्समासे बहुव्रीहौ । अत्र सर्वनामता वा स्यात् । उत्तरपूर्वस्यै उत्तरपूर्वायै । दिङ्नामान्यंतराले इति राम॰
प्रतिपदोक्तो दिक्समासो गृह्यते । तेनेह न । या पूर्वा सा एवोत्तरा यस्य अंतस्य तस्मै पूर्वोत्तराय । एवं च बहुव्रीहिग्रहणं न कर्त्तव्यं ।

सत्वात् तु कृशित्वः ऐक्येनतुल्यतेदितासु त्ववोधनार्थमेवेतंक अनंतस्य पुंस्त्वपः पुंवद्भावतरपधापिनोक्त इतितरं यर्मधनंतत्वेनकरयापिसिद्धहारिदमपिथिलंउ १ मेनैकात्कु कसिद्धिसिद्धं २

सम्भवत्स्वेकैकस्मै कौद्विकेपिकाल्पनिकैकार्थ्यभावस्त्रीकारात्तत्राप्युपसर्जनतास्येवेत्युक्तत्वाविंसमेलनरकायइभावकल्पनायाः दृष्टपरत्वात्क स्वाभाव इत्येको विदाकृः ८

दक्षिणोत्तरपूर्वाणामिति द्वंद्वस्य लक्षणप्रतिपदोक्तपरिभाषयैव वारणात् । ननु अत्राशंयंतत् । तथाहि । एकं बहुव्रीहिवत् आबा
धे चेति द्विर्भावे एकैकस्मै देहि दक्षिणादक्षिणास्मै इत्यादौ दीष्यते । तत्रोत्तरसूत्रेण निषेधो माभूत् बहुव्रीहिरेव यो बहुव्रीहिर्नत्व
तिदिष्टबहुव्रीहिस्तत्रैव यथास्यादिति । मैवं समासग्रहणानुवृत्त्या पुष्कलार्थलाभात् । उत्तरसूत्रस्य प्रत्याख्यानाच्च ॥ ॥न ब
हुव्रीहौ । बहुव्रीहौ कर्त्तव्ये सति सर्वनामसंज्ञा न स्यात् । त्वकं पिता यस्य सः त्वत्कपितृकः अहकं पिता यस्य मत्कपितृकः इ
के पुत्रो यस्य द्विकपुत्रः इह हि समासप्रवृत्तेः प्रागंतरंगत्वात् अकच् प्रवर्त्तेत स च समासेस्यापि श्रूयेत अतिक्रांतो भवकंतमति अत्रालौकिके कप्रसक्तिः ५
भवकानितिवत् नहि वृत्तेः प्रागपि उपसर्जनतास्ति ननु यदि प्रागेव प्राप्नुवन्नकच् निवर्त्तितः तर्हि त्वकंपितेत्यादि कथं विग्रह्य
ते त्वत्कः पितेत्यादिक प्रत्ययप्रदर्शनोचित्यादिति चेत् भ्रांतोसि न हि यस्मिन्नलौकिके वाक्ये उपेक्षामात्रगोचरे बहुव्रीहिसंज्ञा
प्रवृत्ता सर्वनामसंज्ञा च निषिद्धा तत्प्रयुज्यते अपरिनिष्ठितत्वात् । किंतु तत्सदृशं बहुव्रीहिसंज्ञारहितं पंवाक्यांतरमेव यदाहके
पदः अप्रयोगसमवायि यत्प्रक्रियावाक्यं तत्रायं निषेधो न तु लौकिके तस्य पृथगेव प्रयोगात् तादर्थ्याभावादिति अतएव दृष्टः सर्व
ये नेत्येव विग्रहः न तु सर्वाइति राज्ञः पुरुष इत्यादि विग्रहेपि षष्ठ्येवेति । अलौकिके वाक्ये अल्लोपोन इत्यादेरप्रवृत्तेः अंत
रंगानपि विधीनिति सिद्धांतात् । अतएव गोमत्प्रियइत्यादौ सोलुगेव । ननु हल्ङ्यादिलोपः तेन नुम्दीर्घादयो न प्रवर्त्तेतेभा

श॰ वृ॰ कौ॰ पेतुत्वकृत् पित्वकृ इत्याद्येव रूपं स्वी कृतम् उदंस्त्वत्रं प्रत्याख्यातं यदाह अकच्स्वरौ तु कर्तव्यौ प्रत्यंगं मुक्तसंशयाविति। अंगं प्रतीति प्र
त्यंगं। अनकारांतेषु त्वकत्पितृकः कोटकिपुत्रः इत्यादिषु कच् विश्वप्रिय इत्यादिषु द्वंद्वेषु तु स्वांग शिटामदंतानामित्याद्युदात्ततेति
विषमविवेको बोध्य इत्यर्थः यथोत्तरं मुनीनां प्रामाण्यात् द्वाभ्यो कैर्वव्यवस्थेत्यवधेयं। तृतीयासमासे। अत्र सर्वनामतानस्या
त् मासपूर्वाय। लक्षणप्रतिपदोक्तयोर्भाष्ययापूर्वसदृशेति तृतीयासमासोऽग्रह्यते न तु कर्तृकारणे कृतेत्यादि रपि ते न त्वपका
कृतौमित्यादौ वक्ष्यमाणनिषेधेन। समासइत्यनुवर्तमाने पुनः समासग्रहणं गौणार्थस्यापि संग्रहार्थं। तेन समासार्थवाक्ये
पि निषेधः। मासेन पूर्वाय। अयं च लौकिके वाक्ये निषेधो न तु न बहुव्रीहाविति वद् लौकिके। अकारांते काकचौरविशेषेण
अनकारांतानां प्रतिपदोक्ततृतीयासमासविरहेण चालौकिके निषेधस्यैवेप्यपत्तेः। द्वंद्वे च। इह उक्तसंज्ञानस्यात्।
पूर्वापराधराणां समुदायस्यायं निषेधो न त्ववयवानां। तथा हि। त्यदादीनां तावद्द्वंद्व एव नास्ति। त्यदादीनि सर्वैर्नित्यमित्येक
शेषेण बाधितत्वात्। न च द्वंद्वे द्वे चेति निषेधापत्तेस्थ्या त्यदादिभ्यः प्राचीनात्त्व दंताः। तत्र काकचौरविशेषः। सर्वनाम्नो वृत्ति
मात्रे पुंवद्भावस्त्विष्यते एवं दक्षिणोत्तरपूर्वाणामिति। किंच सर्वनामसंज्ञानिषेधे नाप्यसेदुर्वारः। तत्र हि मात्रग्रहणं कृत्वि राम॰
सर्वनामत्वेन दृष्टानां संप्रत्यसर्वनामत्वेपि पुंवद्भावो वार्यः। अत एव दक्षिणपूर्वायै इत्यत्र संज्ञाभावेपि पुंवद्भावः। न त्ववयवे चे
द्वंद्वे कृते एकशेषः नित्यमित्येक एकवद्भाव स्वरसमासांत प्रसंगेन द्वंद्वापवाद पक्षस्यैव स्थापयिष्यमाणत्वात् अन्यथा तेषामिति स्याद्वपिः
न च विशेषेण पुंवद्भावे परवल्लिंगमिति परवल्लिंगताया मपि स्त्रीयं न लभ्येत मित्येनवन्या व्यवस्थायां विधमानलिंगस्य समासे विशेषण एवं अपि निपुनरितिदेशेन समुदायस्य अभिप्यति लाघुः २

न च सर्वनाम्नो विहितत्वे निषेधात् द्विवितत्र मस्येयं तियांच विधानात् सर्वनामग्रहणाभावेन नस्य पिशेष्यप्रयोगात् २ अयं चार्थो व्यवस्थि नीयेभाजमेतिकं चित् कैयटे प्रकारद्वयमन्यत् २

त्संज्ञानिषिद्धा तर्हि अंगाधिकारे तस्य तदुत्तरपदस्य चेति वचनाद् दक्षिणोत्तरपूर्वाणामित्यादौ सुडागमादिप्रसंगः। न च निषे
धसामर्थ्यात् अनांगस्य त्वनादेर्वा व्रस्याचरितार्थत्वादिति चेन्न। अंगकार्येषु सर्वनाम्नो विहितस्याम इः ङः सिद्धोरित्या
दिक्रमेण व्याख्यानात्। विहितविशेषणात्वस्याश्रयणे प्रमाणं तु दक्षिणोत्तरपूर्वाणामिति भाष्यप्रयोग एव। तस्मात्समुदाय
स्यापं प्रतिषेधो नावयवानामिति स्थितं। अत एव सर्वनामसंज्ञायां तदंतविधिमुद्भावे द्वंद्वे चेति ज्ञापकमित्युक्तं विभाषा ज
सि। जसी ति कार्यापेक्षया अधिकरणसप्तमी। जसाधारं यत्कार्यं शीभावाख्यं तत्र कर्तव्ये द्वंद्वे उक्ता संज्ञा वा स्यात्। वर्णा
श्रमेतरे वर्णाश्रमेतराः। शीभावं प्रत्येवेयं विभाषेति व्याख्यातं। तेनाकज्न भवति। तस्मिन्कर्तव्ये द्वंद्वे चेति नित्यं निषेधात्। अ
तस्तत्र कप्रत्यय एव भवति वर्णाश्रमेतरकाः। के न व्यवधानान्नेह शीभावः। अकचि कृते तु तन्मध्यपतितन्यायेन शीभावः
स्यादेव। प्रथमचरमतयाल्पार्द्धकतिपयनेमाश्च। एते जसः कार्यं प्रति सर्वनामसंज्ञा वा स्युः। [illegible] प्रथमे प्रथमाइत्यादि।
शेषं रामवत्। नेमे नेमाः। शेषं सर्ववत्। इहापि प्राग्वद्भीभावं प्रत्येव संज्ञाविकल्पः। तेन प्रथमकाइत्यादाव कज्न। अन्यथा
प्रथमके इति स्यात्। उभयशब्दस्य तु नेयं विभाषा किं तु नित्या संज्ञेति गणव्याख्याप्रसंगे नो ययादिति। पूर्वपरावरदक्षिणो
त्तरापराधराणि व्यवस्थायामसंज्ञायां। स्वमज्ञातिधनाख्यायां। अंतरं बहिर्योगोपसंव्यानयोः। एषां त्रिसूत्रीगणस्थापि

नेमशब्दस्य तु नेमके नेमकाइति भवेत्तवत् २

श॰ कौ॰ प्यते। साच व्याख्याता। तथा यस्मिन्नेवोपाधौ नित्यासंज्ञा प्राप्ता तत्रैव जसि विभाषा नैया विधीयते। पूर्वपरावरेत्यादि। स्वे स्वाः। आत्मी
याः इत्यर्थः। आत्मान इति वा। इह निमित्ताप्याय हूत्कार्यं तत्सर्वं गणा त्रयारम्भावसरे एवोक्तं। विभाषाप्रकरणे तीयस्य ङित्स्विति। तस्य संख्या
ने। द्वितीयस्मै। द्वितीयायेत्यादि। एकादेशस्य पूर्वान्तवद्ग्रहणेन ग्रहणात् ङित्त्वि विशिष्ट्य विभाषया वा द्वितीयस्ये द्वितीयायेस
प्यपि सिद्धं। एवं च विभाषा द्वितीयात् तीयाभ्यामिति सूत्रं न कर्तव्यं भवति। अर्थवत्त्वात्प्रतिपदोक्तत्वाच्च तीयः। नेह। संप्रसारणं
चेत्यय मेवग्रहणे। तेनेह न। प्रकारवचने जातीयर्। पटुजातीयाय। जातं तावत् बंधुनि। ब्राह्मणजातीयाय। मुखपार्श्वतसोरीयः। मुखपार्श्व
तसं तावंगहादिभ्यश्चेति छः। मुखतीयाय। पार्श्वतीयाय। तस्याद्वितीयायभागायेत्यत्रापि न भवति। पूरणाद्भागे तीयादन्नि
ति अनि कृतेयस्यानि चेत्त कारस्य लोपे च सति तीयस्य लाक्षणिकत्वादिति दिक्॥ ॥ इति सर्वनामसंज्ञाप्रकरणं॥ स्वरादिनिपात
मव्ययं। स्वरादयो निपाताश्चाव्ययसंज्ञाः स्युः। प्राग्रीश्वरान्निपाता इत्यारभ्य अधिरीश्वरे इत्येतत्पर्यंतं ये वक्ष्यंते ते निपाताः। न
न्वेवं चादिष्वेव स्वरादयोपि पठ्यंतां। प्रकृतसूत्रं च त्यज्यतां। अव्ययप्रदेशेषु निपातशब्देनैव व्यवह्रियतामिति चेन्न। चादीनां हि
असत्ववाचिनामेव निपातसंज्ञा। यथा लोधं नयंति पशुं मन्यमाना इत्यत्र सम्यगर्थस्य पशु इति शब्दस्य। न तु सत्ववाचिनां। यथा। राम॰
पशुं स्नां। श्रुके वा पव्यामित्यादौ। स्वरादीनां तु सत्ववचनानामप्यव्ययसंज्ञेष्यते स्वस्ति वाचयति। स्वः पश्येति पथा। अथ प्रा

एतदं तस्मा निपातत्वाभावेऽपि ... अव्ययसंज्ञाविधानेऽपि ... निपातसंज्ञाकरणसामर्थ्यात् ... निपातसंज्ञा ... निपात एकाजिति ...
निषेधबाधनेऽपि ... अव्ययस ... नामनपुंसक ... तस्य संज्ञा ... निमित्तस्य ... इति ...

६२ ग्रीश्वरान्निपाताः। स्वरादीनि। चादयोऽसत्त्वे इति कृतेन सूत्रमिति चेन्न। एवं हि सति निपात एकाजनाङिति प्रगृह्यसंज्ञा स्वरादी
नामप्येकाचां प्रसज्येत। सोहि स्वरादिषु किमोत् इस्त्रियाँ च इत्येको चोत स्थितौ। केचित्तु अत एव पस्तु कृत एकाचः। यदि तु चादिरेकाजना
ङिति क्रियेत तर्हि चादीनामसत्त्ववचनत्वं विशेषणं न लभ्येत। ततश्च अस्यापत्यं इः मदनः तस्य संबोधनं अ इत्यत्र प्रगृह्यत्वं
स्यात्। ननु चादयोऽसत्त्वे इत्यत्र असत्त्वे इति पाठविशेषणं। तथा हि चादय इति योगो विभज्यते। चादयो निपातसंज्ञाः स्युः। ततः अ
सत्त्वे इह शास्त्रे चादयोऽसत्त्वे ज्ञेयाः। ततश्च चादीनां सत्ववाचिनां पाठात्पर्युदासः। तेन एवेत्यादौ न दोषः। एवं चैतदुभयं तेन क
र्तव्यं। अव्ययं निपाता इति। किंतु प्राग्रीश्वरान्निपाता इति वा अव्ययानीति वा सूत्र्यतां। ततः स्वरादीनि। तद्धितश्चासर्वविभक्तिः।
इत्यादि अव्ययीभावश्चेत्यंतं सूत्र्यतां। ततश्चादयोऽसत्त्वे इत्यारभ्य यावदधिरीश्वरे विभाषा कृञीति। तथा यस्मिन्प्रदेशे निपातग्र
हणं तत्र चादिग्रहणमस्तु। अव्ययप्रदेशेऽव्ययग्रहणं निपातग्रहणं वेति। उच्यते। अव्ययसंज्ञाविरहे अन्वर्थसंज्ञाबलल
भ्ये वक्ष्यमाणप्रयोजनं न सिध्येत्। निपातसंज्ञाविरहे तु यांत न वाचार्यमणीतस्य निपाता आद्युदात्ता इति फिट्सूत्रस्य विषय
विभागो न लभ्येत। अपि च फिट् द्विरनवादिशब्दानामिव निपातशब्दस्यापि अन्यत एवार्थाध्यवसायः। तर्हि अव्ययसंज्ञामात्रेणाभि
र्थोहः सुकर एवेत्यवधेयं। महासंज्ञाकरणमन्वर्थसंज्ञाविज्ञानार्थं। न व्येति विविधं विकारं न गच्छतीति सत्वधर्मान् लिंगसंख्या

... पाठविशेषणे ... निपातकरणे प्रमाणं ... २ ... ३

रका०

अ०को० ...कादीन्लग्रह्णाति इति यावत्। तेनोपसर्जनप्रतिषेधः सिद्धः। अस्तु चैः सैवं अन्यदुच्चैस्तरति। अतिक्रांतप्रधानत्वेन सत्वधर्मपरिग्रहा
न्नेहाव्ययसंज्ञा। ननु स्वरादिषु उच्चैः शब्दः पठ्यते। तत्र कथं तदंतस्य प्रसंग इति चेन्न। अन्वर्थसंज्ञयैव तदंतविधेरपि ज्ञापनात्।
अन्यथा उपसर्जनेप्रसंगाभावेन निवृत्यर्थी याहतस्याः वैयर्थ्यापत्तेः। तेन परमस्वः परमोच्चैरित्यादौ स्वरादिप्राधान्ये अव्य
यत्वं सिद्धं। अव्ययसंज्ञाया अन्वर्थत्वं आथर्वणे प्रणवविद्यायां श्रुतिरपि दर्शयति। सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु। वच
नेषु च सर्वेषु यन्न व्येति तदव्ययमिति। एतेषु यन्न व्येति किंतु सदृशमेकप्रकारं तदव्ययमिति योजना। यद्वा यस्मान्न व्येति तस्मा
दव्ययमिति। त्रिषु लिंगेषु सदृशं लिंगविशेषप्रतिपादने सामर्थ्याभावादिति भावः। विभक्तिषु कारकेषु वचनेषु एकत्वादिसं
ख्यासु अव्ययीभावस्य पक्षेपि लिंगकारकसंख्यायोगोस्ति तथापि वचनादव्ययत्वं। अथ स्वरादयः। स्वरिति स्वर्गपरलोकयोः।
स्वर्गे। छायेव या स्वर्जलधेर्जलेषु। परलोके। स्वर्यातस्य ह्यपुत्रस्येति। अंतरिति मध्ये। अंतर्बाष्पश्चिरमनुचरः। प्रातरिति प्र
त्यूषे। प्रातः संध्यामुपासीत। एते त्रयोपि तोदात्ता इति काशिका। विंध्यास्तु स्वः शब्दस्य स्वरितत्वात्। तथा च फिट्सूत्रं। न्यङ्स्वरौ स्व
रितौ इति। प्रयोगश्च। अंतरिक्षमथो स्वः। यत्तु प्रातः शब्दः आद्युदात्त इति कश्चित्। तन्न। प्रातरग्निं प्रातरिंद्रं हवामहे इत्याद्यु रम०
दात्तोदात्तस्यैवमसिद्धत्वात्। पुनरित्याद्युदात्तः। अप्रथमे विशेषे च अप्रथमे। पुनरुक्तं। विशेषे। किं पुनर्ब्राह्मणाः पुण्याः

पुनरित्यंतर्धने। सनुतश्चोरो गच्छति। उच्चैरिति महति। नीचैरित्यल्पे। शनैरिति क्रियामांद्ये। ऋधगिति सत्ये। वियोगशीघ्रसामी
५२ प्यलाघवेष्विति अन्ये। ऋते इति वर्जने। युगपदित्येककाले। आरात् दूरसमीपयोः। पृथगिति भिन्ने। एते सनुतरुप्रभृतयोन्तोदात्ता
इति काशिका। शनैश्चिद्यंतो अद्रिवः। ऋधगित्था स मर्त्यः इत्यत्र तु शनैः ऋधक् शब्दौ आद्युदात्तौ प्रयुज्येते त्यस्य इति अप्रती
तेन्हि। ह्यो न्यागतेह्नि। दिवेति दिवसे। रात्राविति निशि। सायमिति निशामुखे। चिरमिति तु बहुकाले। मनागिति ईषदर्थे। ईषदि
त्यल्पे। जोषमिति सुखमौनयोः। तूष्णीमिति मौने। बहिस्अवसइत्येतौ बाह्ये। समयेति समीपे मध्ये च। ग्रामं समया। निक
षेत्यंतिके। विलंघ्य लंकां निकषा हनिष्यति। स्वयमित्यात्मनेत्यर्थे स्वयं हतं। वृथेति व्यर्थे नक्तमिति रात्रौ। नञिति निषेधे।
हेताविति निमित्तार्थे इद्धेति प्राकाश्ये। अद्धेति स्फुटावधारणयोः। तत्वातिशययोरित्येके। सामीत्यर्धजुगुप्सितयोः। एते ह्य
स्तप्रभृतयः साम्यंता द्वात्रिंशतिरंतोदात्ता इति काशिका। दिवा चित्तमः कृण्वंति। इध्यास्त्वं जिष्ट्यथिभिः। नक्तं दृश्रो बुद्ध
विद्विवेपुः इत्यादौ तु आद्युदात्ताः प्रयुज्यंते। वत। वत्प्रत्ययांतमव्ययसंज्ञं स्यात्। ब्राह्मणवत्। तेन तुल्यमित्यादिभिर्विहितो
वतिरिह गृह्यते न तु उपसर्गाद्धात्वर्थे इति विहितः। सत्वार्थकत्वात्। यद्गृहतो निवतो यासि बप्सत्। सनेति नित्ये। सनातनेतर
द्रासनातनः। सनत इदमपि नित्ये। सनत्कुमारः। तिर इति अंतर्द्धौ तिर्यगर्थे च तिरोहितः। तिरः काष्ठं कुरु। परिभाषे तु लक्षणं।

४१

शब्द·कौ· तिरस्कृतो ऽमरीरितियथा। हन्नेतास्मशिरोन्ता आघुरा आ इतिकाशिका। स्वस्ति होतानमश्वसन्ति। तिरः चिदश्विना। उत्पादोत्तु
अंतोदात्तं प्रयुज्यते। अंतरेसंतीदात्तः मध्ये विनार्थे च। त्वां मां चांतरण कमंडलुः। त्वामंतरणातामरमायताक्षि। अंतरेणेतिवर्जने। अं
तरेणाहरिं न सुखं। ज्योगिति कालभूयस्त्वे प्रश्ने शीघ्रार्थे सं प्रत्यर्थे च कमिति वारि मूर्धनि शंसुखेषु वारिणि। कं जंपं भं। प्रश्निकं
जाः कचाः। निंद्रायां। कंदर्पः सुखे। कंयुः। शमिति विंसु। शंकरः। सहसेत्याकस्मिका विमर्शयोः। द्विवः प्रसरतं सहसापपात। स
हसाविदधीत न क्रियां। स्वधेति पितृदाने। अलमिति भूषणपर्याप्ति शक्ति वारणनिषेधे। भूषणे अलंकारः। पर्याप्तौ अलम
श·कौ· सधनं। शक्तिरर्थः। अलं मल्लो मल्लाय। शक्त इत्यर्थः। वारणे। अलमतिप्रसंगेन। निषेधे। आलप्यालमिदं वभ्रोर्यत्तदारा
नपाहरत्। न वक्तव्यमित्यर्थः। वषडिति हविर्दाने। विनेतिवर्जने। नानेत्यनेकविनार्थयोः। नानाविधं देहभृतां समाजे। नाना
नारीं निष्फला लोकयात्रा। स्वस्तीति मंगले। अन्यदित्यन्यार्थे। देवदत्त आपातो अन्यच्च यज्ञदत्त इति। अस्तीति सत्तायां।
मतिर्मस्या३ अस्ति परलोके मतिः आस्तिकः। उपांश्विति अप्रकाशोच्चारणे रहस्ययोः। क्षमेति शांतौ। क्षमां करोतु भवान्। विहायसेति वियदर्थे। वि एप५०
हायसा रम्यमितो विभाति। दोषेति रात्रौ। मृषा मिथ्येत्येते वितथे। मुधेति व्यर्थे। श्वोतो सुनः सुनः। हन्तमत्कारसंप्रहर्षे तः। अम
यीभावस्था। इदं गणसूत्रं। अप्यधायीस्थिर आसमानार्थे। वेप्यर्थे तु उद्धरिष्यति। पुरेति अविरते चिराती ते भविष्यदासन्ने

का३

कै२

चापराधीते। अविरतमपाठीदित्यर्थः। पुरिलुङ्चेति लट् चिरातीति पुराधिनवं पुराणं। पुरेदमूर्ध्वं भवतीति वेधसा। समनंतरं भवि
ष्यतीत्यर्थः। स्यान्निबंधे चिरातीति निकटागामि पुरेत्यमरः। मिथो इति रहः सहार्थयोः। मंत्रयते मिथो। मिथस् इत्यपि पूर्ववत्। प्रा
यमिति वाहुल्ये। मुहुस् इति पुनरर्थे। प्रवाहुकमिति समकाले तु ध्वोर्ध्वे च। केचित्तु प्रवाहिकेति पठंति। आर्यहलमिति व
लात्कारे। बलात्कारेण कृत्वा हृ। आ ईति प्रतिबंधे। हलमिति प्रतिषेधविवादयोरिति। अभीक्ष्णमिति पौनःपुन्ये। साकं सार्धमि
त्येतौ सहार्थे। नमस् इति नतौ। हिरुगिति वर्जने। धिगिति निंदाभर्त्सनयोः। तसिलादिस्तद्धित एधाच्पर्यंतः। शसतसीकृत्व
धि९ सुच्। सुच् आस्थालौ। अथोश्चेति। तसिलादिरयमर्थः। पंचम्यास्तसिल्। इत्यारभ्य एधाच्चेत्येतदंतैः सूत्रैर्यकोपस
द्धितांतं ते तः स्वरादिषु बोद्धव्याः। तथा च कृत्वर्थाश्च प्रतियोगे पंचम्यास्तसिः। क्रियाभ्यावृत्तिगणने कृत्वसुच्। द्वित्रिचतु
र्भ्यः सुच्। इण आसिरिति ल्युट्। आदित्यत्रेण आसिप्रत्ययो विहितः। अथ यादृशदाहृदयं। मलपूर्वं विभ्देमात्या। लर्छंदसि मंपघकर्त्त
रि श्विः विभाषासानिकाले। देयेत्रा च। एतदंता अपि व्याख्याः। अम् इति अमुं छंदसि निविहितः। आम् इत्यंगीकारे। आम् कुर्मः। च२
किमेत्ति ऊ. व्यय घादामूकाम् प्रत्ययादाममंत्रे। लिटीत्यपीति केचित्। प्रतामिति ग्लानौ। प्रशानिति समानार्थे। प्रशान्देवदत्तो यज्ञद
त्तेन। प्रतान् इति विस्तारे। मा इति निषेधे। मा भवतु। मा भविष्यति। माङिति निषेधाशंकयोः। माकार्षीत्। अस्यपापं मा भूदिति। आ

शब्द॰को॰ कृतिगणाश्चाप्यं तेनान्येपि ग्राह्याः। तद्यथा। अमिति शीघ्रे अल्पे च। कामम् इति स्वाच्छंदे। प्रकामम् इति अतिशये। भूय इति पुनरर्थे। सांप्रत
मिति न्याय्ये। परम् इति किंत्वर्थे। गुणवानसि। परमहं कामि। साक्षादिति प्रत्यक्षे। साचीति तिर्यगर्थे। सत्यम् इत्यर्धांगीकारे। मंक्षु इति
शीघ्रे। आम् इति च। संवत् इति वर्षे। अवश्यम् इति निश्चये। सपदि शीघ्रे। बलवद् इत्यतिशये। बलवदपि शिक्षितानां। प्रादुः आ
विः इति प्रकाशे। अनिशं नित्यं नित्यदा सदा। अजस्रं संततं। एते सातत्ये। उच्चैरिति तीव्रे। उपांशु नीचैः। रोदसी द्यावापृथिव्यर्थे।
ओम् इति ब्रह्मवाची। भूर्भुवः स्वरिति पृथिव्यंतरिक्षलोकयोः। भूर्लोको भुवर्लोकः। झटिति झगिति सरसा इति शीघ्रे। स्नाकुः। हुतं दे
घ्रे क्षिप्रम् इति च। अतिवेलम् अतिशये। सुष्ठु इति प्रशंसायां। कु इति कुत्सिते षदर्थयोः। कायथं वा स्का। अंजसेति तत्त्वे शीघ्रार्थयोः। ८६
अ इति वहिः। आविर्मिथु इति द्वा विस्मये। मिथु मंत्रयेते। विष्वगिति समंततोभावे। भाजगिति शीघ्रे। भाजक पचति। अन्वगित्यानुकू
ल्ये। चिराय चिरात्राय चिरस्य ग्राक्चिरार्थकाः। आयद्धा ह्यात चिरं चिरेण चिरादिति गत्वंते। अस्तम् इति विनाशे। आनुषगित्यानु
पूर्व्ये। आनुषक् प्रविशती हवं श्रुत। अनुमाने अनुषगिति शाकटायनः। आनुषक् इति दंते केचित्। अम्नस इति शीघ्रसांप्रति
परिकल्पपक्षे कयोः। अन्तरेण विनि रेफो वा स्याने इति युक्तार्थे। वरम् इति ईषदुत्कर्षे। दुष्ठु निकृष्टार्थे। बलात् इति हठार्थे। शु इत्येषणायां। शुना राम॰
सीरः क्षमेति क्षांतौ। अर्वाग् इति प्राचीने। सुदि शुक्लपक्षे। इति स्वरादिः। तद्धितश्चासर्वविभक्तिः। तद्धितांतः शब्दो व्ययं स्या

उपसर्गाश्चंद्रसमिति वदितनिभः तस्य लिंगं संख्या कारकाश्च पिलाह्य ५ पंचैव पंचकाः शकुनयः अभ्यो गणिः ३ अपमेवचवैसयस्मानिभाप ६

त्। यस्मात् सर्ववचनत्रयात्मिका विभक्तिर्नोत्पद्यते। किंत्वेकवचनमेव। ततः। तत्र तद्धित इति किं। एकः द्वौ बहवः। असर्ववि
भक्तिरिति किं। औपगवः। ननु गोत्रे वंश्या इत्यादावतिव्याप्तिः। न च लुब्योगाप्रख्यानात् योगप्रमाणे च तदभावे दर्शनं स्या
दिति पठतः सूत्रकृतो मते नैतेन तद्धितांता इति वाच्यं। एवमपि पचति कल्पं पचति रूपम् इत्यादावतिव्याप्तेर्दुर्वारत्वादिति चे
त्। अत्राहुः। वाक्यकारः सिद्धवत्पाठात्। तसिलादयः प्राक्पाशपः। शस्प्रभृतयः प्राक्समासांतेभ्यः मांतः कृत्तोर्थः तसि
वतीनानाञाविति। न च एवमपि कृत्वा विस्पष्टिका प्रत्ययः सर्वविभक्तिमात्याल् छंदसीति विधानात्। तदंतस्यासंग्रह इति वाच्यं।
प्रकारवचने थाल्। इति प्रकरणे एव प्रत्नादिभ्य उवे थाल् छंदसि प्रकारवचने इदमस्थमुः इति यद्वित्तु शब्दव्ययत्वात्। स्वरादिग
णे अमाम् थाल् इति पाठेन सिद्धत्वात् च। मांत इति। अम् आम् अम् चेत्यर्थः। तसि। प्रतियोगे पंचम्यास्तसिः। तेनैकदिकृतसिश्चे
सामर्थ्यादिति भाष्य:४ ति द्वावपि गृह्येते। स्यादेतत्। सत्रम् अतेकं धासुक्रिसंभवः। यावता कर्मणि द्वितीया ह्येकयोर्द्विवचनैकवचने इत्यादीनां स्वादि
वाक्येन एकवाक्यतायां ह्यव्ययेभ्यः स्वादीनां प्राप्तिरेव नास्ति। अव्ययादाप्सुप इति ज्ञापके न तु सर्वा विभक्तयः। उच्यते। अ
व्ययेभ्यः सप्तानामपि विभक्तीनां त्रीण्यपि वचनानि। तथा सप्तानामप्येकवचनान्येव। अथवा प्रथमाया एकवचनत्रयं य
दा प्रथमायाः एकवचनमेवेति यच्च चतुष्टयं तद्यत्र ग्रंथेषु लभ्यते। तथापि प्रथमैकवचनमात्रमेवेति चतुर्थपक्ष एव क्षोदक्षमः।

[illegible]

शब्द०कौ० तमेवगृहीत्वा सूत्रस्याप्युक्तिसंभवः स्पष्टः। इतरत्तु पक्षत्रिकं अस्पुष्टत्वयवादमनेरणोपन्यस्यते। ननु तात्विकं। तथाहि। यदि कर्मणि
द्वितीयैव। अभिहिते प्रथमैव। एकत्वे एकवचनमेवेत्यादिरर्थनियमः। यद्वा द्वितीया कर्मण्येवेत्यादिः प्रत्ययनियमः। तथापि पक्षे विभक्तिनिय
मः। यद्वा। एकवाक्यत्वे सामान्यापेक्ष वचनविभक्तिनियमे यद्वा अव्ययादाप्सुप इति सामान्यापेक्षज्ञापकाद्विभक्तिसिद्धित
दाऽविशेषात्सप्तानामपि विभक्तीनां त्रीण्यपि वचनानीति पक्षो लभ्यते। यदा तु द्वित्वे द्विवचनमिति सूत्रयित्वा एकवचनमि
त्येव पृथक्सूत्र्यते। तदन्यथानुपपत्त्या च कर्मण्येव द्वितीया। न करणादौ। द्वित्वबहुत्वयोरेव द्विवचनबहुवचनेन त्वेकत्वे इत्या
दिक्रमेणाह जातीयापेक्षो नियमः। तत्रश्चाव्ययेभ्यः सकलविभक्तिप्राप्तौ एकवचनमित्यनेन नियमः क्रियते। यत्रैकव
चनं चान्यच्च प्राप्नोति। तत्रैकवचनमेवेति। यद्वा सामान्यापेक्षनियमाश्रयणादव्ययादप्राप्तो एकवचनमिति सूत्रं क्रि
यते। तस्य च द्व्याप्नोति यद्विकाद्यनेनैकवाक्यता। तथा च द्वाबादिभ्यः कर्मादिषु एकवचनं सिद्धमेवेति एतत्सूत्रबला
दव्ययेभ्य एव भवति। तिङंतानुभवति। एकवचनमित्यस्याप्राप्तप्रापणार्थत्वेपि ज्ञापकसूत्रेण एकवाक्यत्वात्। प्रदेशांतरे
पाठसामर्थ्याच्च। स्वांतं अयेणापि ज्ञापकसूत्रं विधायकमिति द्वित्वे द्विवचनादेर्नियामकत्वं संगच्छते। तदा अव्ययेभ्यः सर्वाण्येक राम०
वचनानीति द्वितीयः पक्षो लभ्यते। यदा तु द्वितीया कर्मण्येवेत्यादिः सामान्यापेक्षः प्रत्ययनियमः अव्ययेभ्यस्तु प्रथमैव। प्र

[illegible]

[illegible]

यमा प्राप्तिपदिकार्थ एवेति नियमेन हि कर्माद्याधिक्यस्थले एवस्य निवार्यते। द्व्येकयोरिति तु यथान्यासमेव तत्र च एकत्व एवैक
वचनं न सांख्यांतरे इति सजातीयापेक्षप्रत्ययनियमपक्षः। तदानिः संख्येभ्योऽव्ययेभ्यः प्रथमापाव चनत्रयमपि भवतीति
तृतीयः पक्षो लभ्यते। त्रिष्वपि पक्षेषु पचतिकल्पं पचतिरूपमित्यादौ दोषः। तत्र हि प्रथमैकवचनमात्रमिष्यते। उक्तपक्ष
त्रयेष्वधिकं प्राप्नोति। तस्माद्द्वितीयपक्षरीत्या सकलैकवचनानि प्राप्य एकवचनमित्येकत्वस्याविवक्षितत्वात्प्रथमातिक्र
मेकाणाभावात्प्रथमैकवचनमेव कर्तव्यमिति सिद्धांतः। एवं च सत्यपि सूत्रस्योक्तिसंभवे पचतिरूपमित्यादावतिव्याप्ति
भयात्परिगणनमेव कर्तव्यं। सूत्रं तु न कर्तव्यमिति स्थितं। कृन्मेजंतः। कृद्यो मांत एजंतश्च तदंतमव्ययसंज्ञं स्यात्। स्वादुंका
रं भुंक्ते। वक्षेएयः। तुमर्थे से इति वचेः सेप्रत्यये रूपं। नन्वेवं कारयांचकारेत्यामंतस्य न प्राप्नोति। अत्राहुः। विततया लिटः
कृत्त्वेपि मांतत्वाभावात्तत्वं। स्वरादिष्वामिति पाठात्सिद्धं। यदि तु तत्र तद्धितस्यैव ग्रहणं तर्हि इहकृदंतत्वादुत्सर्गान्नाम
विमुणं आम इति लुग्भविष्यतीति तत्र हि लेशिति नानुवर्तते न चैवं तरबादेरपि लुगापत्तिः। अपरिस्समासार्थतयांतरवा
द्युत्पत्तेरेवाभावात्। अपरिसमासार्थत्वं च संख्याकर्त्री द्विविषयकोत्थिताकांक्षा। अत एवानुप्रयोगः साध्यते। आमंता
र्गतप्रकर्षादिमनीतिस्तु अनुप्रयोगादुत्पन्नेन तरवादिना भविष्यति। अत एव सूत्रितं। कृञ्चानुप्रयुज्यते इति। अ

[illegible]

पूर्वोत्तरसाहचर्याच्चेतिपिनोध्यं   अविकृतानामनव्ययानांसत्वेतुप्रभावायं १

सुरा त्रीहि व्यवहितस्य विपरीतस्य च प्रयोगनिवृत्तये इति वक्ष्यते। पद्मादन्वस्त्रीं क्तनिष्कर्षरीत्या आमंतत्वोरेवोत्पत्तौ हल्ङ्यादिलोपो भ
विष्यति। अस्तु वा कृदंतं यन्मेजंतमिति वास्यार्थः। आमंतं हि प्रत्ययलक्षणेन कृदंतं भूयते च मांतं। न चैवं प्रतामोप्रतामः। लवमाच
क्षाणो लौ रिलाटावति व्याप्तिरिति वाच्यं। स्वरादिषु प्रशान् शद्वस्य पाठेन धातोः प्रत्ययलक्षणेन कृदंतत्वे सुपजीव्याव्ययसंज्ञा न भ
वतीति ज्ञापितत्वात्। न च मोनोधातोरिति नित्वेन तन्मांतमिति कथं ज्ञापकतेति वाच्यं नत्वस्यासिद्धत्वात्। न च शानतेजन इत्यस्मो
र्यीतरत्र त्रित्वे शानयतीत्यादिप्रयोगसिध्यर्थं चुरादित्वस्वीकारेणानित्यसनंतत्वाभावात्तस्यैवायं स्वरादिषु पाठ इति वाच्यं। अन
भिधानात्तस्मात् क्विपो नुत्पत्तेः। अत्र च ज्ञापकत्ववर्णनपरं भाष्यमेव प्रमाणं। अव्ययमित्यन्वर्थसंज्ञाबलाद्सत्वार्थस्य साम्यवा
चिन एव प्रशाम्शद्वस्य तत्र ग्रहणं न तु शांतिमद्वाचकस्य। तेन प्रशामौ प्रशामः स्तु दाहरणं न विरुध्यते। स्वस्त्यादीनां तु सत्वा
चिनामपि पाठसामर्थ्यादव्ययत्वमिति विशेषः। अंतग्रहणसामर्थ्यान्निस्मयोगे बहुव्रीहिणाश्रीपते। तेनत्र्योपदेरिकरञ्जरस्य
ते। नेह। आधये। चिकीर्षवे। कुंभकारेभ्यः। वस्तुतस्तु अंतग्रहणं व्यर्थीलक्षणप्रतिपदोक्तपरिभाषयैवातिप्रसंगभंगात्। ननु   रामः
वर्णग्रहणेऽयं परिभाषा न प्रवर्त्तते। अन्यथा एचोपवायावइत्यादावतिप्रसंगादिति चेन्न। एवमपि बहिरंगपरिभाषया सन्निपा
तलक्षणो विधिरनिमित्तं तद्विघातस्येतिपरिभाषया वेष्टसिद्धेः। अयमत्रार्थः। सन्निपातः संश्लेषः। तन्निमित्तो यो विधिः स तद्वि

न तु तत्र व्ययसंज्ञा... सन्निपातपरिभाषया...
...अव्ययमानंभस्य नित्यत्वं भाष्ये पि सन्निपातपरिभाषा... गणपठितस्यैव तः अमुद्र... ५

घातस्यानिमित्तं। तं सन्निपातं यो विहंति स तद्विघातस्तस्येत्यर्थः। एवं च सुपं निपातलक्षणस्यापोडिति गुणस्य बहुवचने झल्ये
दित्येत्वस्य चाव्ययसंज्ञां प्रति निमित्तत्वेन सर्वथेयं। तथा परिभाषायाः प्रयोजनांतराण्यपि संति। रिद्धात्रं न्यते। श्रीपं कुलं। तस्मेश्री
पायेत्यत्रातो लोपो न भवति। न यान्त्र गवीत। अनाव्यीत। यस्य हल इति लोपो न। तथा अतिजरं कुलं। अतिजरेण। अतिरैः। अति   जरू
जरादित्यत्र अमृ इन एस् आत् इत्येषु अकारमुपजीव्य कृतेषु सत्सु जरसादेशो न भवतीत्यादि। अनित्या चेयं परिभाषा। कष्टाय क्रमणे
नप्रकृतयोरित्यादि ज्ञापकात्। तेन अभिमानित्यत्र ह्रस्वनुड्भ्यां मतुबिति ङ्भितोदात्तत्वं न्तात्यरस्य मतुप उदात्तत्वे कृते तच्छेषनिघा
ते न प्रकृतेरनुदात्तत्वं भवत्येवेतिदिक्। गोम्लौ निर्ग्लशित्यत्र नेदं सूत्रं प्रवर्त्तते। उणादीनामव्युत्पन्नत्वात्। व्युत्पत्तिपक्षे पि ज्ञिरव्ययमि
त्युणादिसूत्रेण ओऽ प्रत्ययांतानामंता एवाव्ययमिति नियमस्य कृतत्वात्। क्त्वातोसुन्कसुनः। एतदंतमव्ययं स्यात्। कृत्वा। पुरा
सूर्यस्योदेतोः। पुरावत्सानामपकर्तोः। भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्। ऋ। क्रस्य विसृपो विरप्शीन्।
पुराजृम्भ आतृदः। शुपित्रदोः कसुन्निति कसुन्। अव्ययीभावश्च। अयमव्ययसंज्ञः स्यात्। विषयपीगणनं कर्त्तव्यं। लुङ्किमु
खस्वरोपचारार्थो निर्दिष्टत्वोच्चेति। तदपम्मि। प्रत्यग्नि। अव्ययादाप्सुप इति सुपो लुक्। उपाग्नि मुखः। प्रत्यग्नि मुखः। मुखं स्वांगमि
त्युत्तरपदांतोदात्तत्वे प्राप्ते नाव्ययदिक्शब्दगोमहत्स्थलमुष्टिपृथुवत्सेभ्य इति प्रतिषेधः। तथा च बहुव्रीहौ प्रकृत्येति पूर्वपदप्रकृ

ग्र॰ कौ॰ तिस्वर एव भवति। एवं परं च समासस्वरेणांतोदात्तो। विसर्गस्यानिकस्य सकारस्तद्व्यवचार इति प्राचां संज्ञा। तन्निष्ठतोपधा। उपपयः कामः उपपयः कामः। इह अतः कृकमीति प्राप्तं सत्वं अनव्ययस्येति पर्युदस्यते। इह च स्वरानिवृत्तिरेव मुख्यं प्रयोजनं। लुकुनोनाव्ययीभावाद् अत इति विशेषप्रतिषेधात्सिद्धः। उपचारनिवृत्तिरपि न प्रयोजनं। अतः कृकमीत्यत्रानुवृत्तेः पदस्य स्येत्यनुवृत्तेरेव तत्सिद्धेः। परिगणनं किं। उपाग्नभीयानि। परांगवद्भावेन षाष्ठ्यामंत्रितस्य वेत्याद्युदात्तत्वं यथा स्यात्। तत्र हि अव्ययानां प्रतिषेध उपसंख्यातः। उच्चै रधीया नेत्यादौ मा भूदिति। तथा उपाग्निकं इत्यादौ अव्ययसर्वनाम्नामित्यकच्। उपकुंभे मन्यः। इत्यत्र नव्ययस्येति वर्त्तमाने अमूर्द्धियेति मुम्प्रतिषेधो न। उपकुंभीभूतः। अस्य च्वावित्यस्य ओपसंख्यानिकः प्रतिषेधो न भवति। वस्तुतस्तु इदं सूत्रं न कर्त्तव्यं। लुक उपचारनिवृत्तेश्चान्यथोपपत्तेरुक्तत्वात्। मुख्यस्वरनिवृत्तिः परमवशिष्यते। तत्र केचिदाहुः। मुख्यस्वरो त्रेष्यते एव। अपरे तावत्प्रयोजनं स्यात् तत्रैवापं च सूपान्ना अपारव्ययीभावाच्चेति भाष्यस्वरसादिति। अन्ये तु अनव्ययमव्ययं भवतीत्यन्वर्थसंज्ञाविज्ञानादेव मुख्यस्वरनिवृत्तिर्भविष्यतीति। स्यादेतत्। स्वरादित्वेनैव सिद्धत्वात्तद्धितश्चेत्यादि च तुः सूत्रीमपि। तत्र हि तसिलादिस्तद्धित एवाव्ययं तद्दसादि नाव्ययार्थाश्चेत्यं तेन आसिमोराणदिकं वर्जयित्वा तद्धितश्चासर्वविभक्तिरित्यस्यार्थः संगृह्यते। कृन्मकारसंध्यक्षरांतः इत्यनेन कृन्मेजंतः इत्यस्यार्थः संगृह्यते। क्त्वातोसुन्कसुनोमपीभावश्चेति सूत्रद्वयं तु स्वरूपेणोपयुज्यते इति। अ

एम०

नाव्ययमव्ययीभाव गोमहदित्याद्यसिद्धत्वात्सः कर्त्तव्यः केचित्तु अप्रत्ययश्च वाभाव्ययं प्रयोजनं स्यात् नो चेदिकमव्ययस्य लक्ष्य इत्यस्य वकृ प्रयोजनं नित्यं पारम्परिक इत्यस्य इति भाष्ये प्रयोजन ४

अथापि विशेषणसामार्थ्यवचनमावश्यकं तस्यानुरोधेन निष्फलत्वं प्रतिपादितं गौरवमिति। अनन्तरपुनर्विधानात्स्वरादिस्तसिलादिरिति अव्ययीभावस्य तु पुनर्विधानं विधेर्द्विरुक्त भवति नित्यानित्यनित्यस्य। सर्वविभक्त्या च नित्यस्यास्य तु अव्ययस्य नित्यत्वेन। सर्वत्रैव अप्यस्य रूढत्वात् अतः प्राकृत्य वरणं। मरासंज्ञाकरणाद्मुख्यस्वरनिवृत्तिः तसिल् आदिः अव्ययसंज्ञा वित्यं नित्यं शिविर

त्याहुः। पुनर्वचनमनित्यत्वज्ञापनार्थं। तेन प्रागुक्तं लुङ्मुख्यस्वरोपचारा इति परिगणनं लभ्यते। नलोकाव्ययेत्यत्राव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेध इति वक्तव्यमारांचलभ्यते इति। वस्तुतस्तु मास्तु चतुःसूत्री। अव्ययीभावश्चेति तु गणे पिमास्तु। उक्तरीत्या अन्वर्थसंज्ञयैव सिद्धेः। तोसुन्कसुनोरप्रतिषेध इत्येव लाघवात्पठ्यतामिति युक्तः पंथाः। शि सर्वनामस्थानं। शि इत्येतत्सर्वनामस्थानसंज्ञं स्यात्। वारीणि। सर्वनामस्थाने चासंबुद्धाविति दीर्घः। यदि तु प्रदेशेष्वेव शेश्चेत्याद्युच्येत तर्हि सुडनपुंसकस्येति शिसुटोरित्युच्येत तर्हि नपुंसकसुटोपि ग्रहणं स्यात्। शिग्रहणं तु आसमर्थ्यं स्यात्। तस्मात्संज्ञा तावत्करणीयामहासंज्ञाकरणं तु पूर्वाचार्यानुरोधात्। सुडनपुंसकस्य। सुड् इति प्रत्याहारः। नपुंसकभिन्नस्याद्यं पंचवचनानि उक्तसंज्ञानि स्युः। राजा राजानौ राजान इत्यादि। प्राग्वद्दीर्घः। अनपुंसकस्येति किं। सामनी। विभाषाडिश्योरित्यल्लोपाभावे दीर्घो न भवति। अनपुंसकस्येति

स्व ८ पर्युदासः। तेनास्य सूत्रेस्त्री पुंसयोरेव प्रवृत्तिरिति नपुंसके न विधिर्नापि प्रतिषेधः। तेन वनानि संतीत्यत्र एर्वसूत्रेण प्राप्ता संज्ञा भवत्येव। प्रसज्यप्रतिषेधे तु सापि निषिध्येत। यद्यपि अनंतरस्य विधिर्वा भवति निषेधो वेति समाधातुं शक्यते तथापि असमर्थसमासो वाक्यभेदश्चेति गौरवं स्यादेव। यद्वा सुट् स्त्रीपुंसयोरिति वक्तव्ये अनपुंसकस्येति सूत्रयतः प्रसज्यप्रतिषेध एव संमतः। गौरवं च प्रामाणिकं। एतेन हि केचिन्नसमासाः असामर्थ्येपि साधव इति ज्ञाप्यते। तेनाश्राद्धभोजी

यपदिष्टपर्युदासे सर्वं प्रभावयोगिनि नेभोक्षण्णस्येव तथाप्यत्र दोषात्संनिषेध्यं २

वनानि पश्यतीत्यत्र शसः सर्वनामकाशः ४

कर्तरि षष्ठी द्वन्द्वः प्रधानं गुणभूतः अप्रधानं शब्द स्वरूपं इति गुणप्रधानविपर्यय एव पदार्थविपर्यासः इत्येव भाष्यप्रयुक्तः इत्यवचनं नाम महासंज्ञा शब्दस्यैव प्रक्रिया परिहि
घनेर्लिम्पवनं महाभिप्राय एवार्थपरा भवेत्। शब्दाः स्वरूपात्स्वरूपा मा भूदिति निमित्तमिति बोध्यं।

शब्द·कौ· आत्मनेपदं स्यादिति सिद्धं भवति। नवेति विभाषा। इति शब्दः काकाक्षिन्यायेनोभाभ्यां संबध्यते। सं च पदार्थविपर्ययसिद्धत्। तेनार्थ एवेह संज्ञी
संज्ञा च निषेधविकल्पयोर्विकल्पः संज्ञा स्यात्। न च तयोः पदार्थतया अनन्वयप्रसंगः एतत्सूत्रारंभसामर्थ्यादेव विधिवाक्येषु वि
कल्पवाचिपदस्य लाक्षणिकत्वात्। उभयत्र विभाषार्थं चेदं सूत्रं। प्राप्तविभाषायामप्राप्तविभाषायां चास्योपयोगः। तथाहि।
